॥श्रीगणेशायनमः॥ हरिकेशाद्यदेवाननंतिपदयोः स्वस्तिहुयेयस्यैत
॥न्मिभाननमलमीडयन्नोहृदिबिभोतिकालोपि॥१॥ निगमागमसूत्रैर्यो
॥यतोस्यजन्मादिलक्षणैरुदितः॥ गजमुखशब्देनासाविसादिभिरव
॥स्थाभिर्विदितः॥२॥ इष्टंमेभूयादितिसर्वोलोकोहिसाधनंकुरुते॥
॥विघ्नवादीनांभक्तिर्मंगलमूतेर्वृद्धर्थमितिभाति॥३॥अत्रग्रथमश्लो
॥कार्थःस्पष्टः॥द्वितीयस्यायमर्थः॥ निगमोवेदःयतोवाग्मनोभूतानि
॥जायंतइत्यादिआगमःस्मृतिःयतःसर्वाणिभूतानिभवंत्यादियुगागम
॥इत्यादिःसूत्रंव्यासस्यजन्माद्यस्ययतइति॥एतेनिगमागमसूत्रैअ
॥स्यविश्वस्यजन्मादिजन्मस्थितिभंगंयतोभवतीत्यादिभिस्तटस्थल

पदवाच्यः

सूरिभिः

क्षणैर्यईश्वरउदितः सःगजमुखशब्देनगजमुखरतिनामार्थेनासावेव
गजाननएवईश्वरेनान्यइतिविदितइत्यर्थः॥तृतीयपद्यस्यायमर्थः॥
हेमंगलमूर्तेहियस्मात्कारणात्सर्वेजनःधनादितःमेममेष्टंकर्मा
णंभूयात्इतिहेतोर्धनादिसाधनंकुरुते॥तत्तस्मात्कारणात्तवसाक्षा
त्कल्याणमुतिवाकल्याणंमंगलंशुभमित्यमरः॥येविघ्नवादीनां
भक्तिंकुर्वंतितेषांभक्तिस्तवदर्थंतवप्राप्त्यर्थमस्तिनतुविघ्नवादिप्रा
प्त्यर्थमितिभावःइतिमेस्पष्टाभातीत्यर्थः॥अत्राक्षपादसूत्राणि
तद्धाव्यवृत्तिवार्तिकानिचश्रावाबालव्युत्पत्तिसिद्धयेउद्देशलक्षण
परीक्षाभिःबोद्धव्यपदार्थकथनंप्रायःसूत्रानुक्रमेणैव
क्रियते॥यस्मात्सुदार्थतत्त्वज्ञानान्निःश्रेयसाधिगमः॥तस्मादागमस्य

॥सर्वेपिजनाःममम
गलंभवतुरतिमंगलरूपत्वात्तस्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मोहादिदोषाणां नाशः॥ तस्माद्धर्माधर्मनिमित्तप्रवृत्तेर्नाशः तस्मादेकविंश
तिदुःखनाशः॥ एवंचदुःखाभावरूपंसिद्धिः क्रमेणपदार्थतत्त्वज्ञा
नाद्भवति॥ तस्मात्तत्त्वज्ञानंवाच्यते॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टांत
सिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्र
हस्थानानिषोडशपदार्थाः॥ प्रत्यक्षानुमानोपमानशब्दाख्यानिच
तुःसंख्याकानिप्रमाणानि॥ आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रे
त्यभावफलदुःखापवर्गाख्यानिद्वादशप्रमेयानि॥ संशयएकः॥ प्र
योजनमेकं॥ दृष्टांतोप्येकः॥ सिद्धांतश्चतुर्विधः॥ सर्वतंत्रसिद्धांतः
प्रतितंत्रसिद्धांतः आधिकरणसिद्धांतः अभ्युपगमसिद्धांतश्चेति॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानिपंचावयवाः॥ तर्कएकः॥ वादोप्ये
कः॥ जल्पएकः॥ वितंडैका॥ सव्यभिचारविरुद्धप्रकरणसमसाध्यसमा
तीतकालाःपंचहेत्वाभासाः॥ छलंत्रिविधं॥ वाक्छलं॥ सामान्यछलं॥
उपचारछलंचेति॥ चतुर्विंशतिजातिविकल्पाः॥ साधर्म्यसमः१ वैध
र्म्यसमः२ उत्कर्षसमः३ अपकर्षसमः४ वर्ण्यसमः५ अवर्ण्यसमः६ वि
कल्पसमः७ साध्यसमः८ प्राप्तिसमः९ अप्राप्तिसमः१० प्रसंगसमः११
प्रतिदृष्टांतसमः१२ अनुत्पत्तिसमः१३ संशयसमः१४ हेतुसमः१५ प्रक
रणसमः१६ अर्थापत्तिसमः१७ अविशेषसमः१८ उपपत्तिसमः१९
उपलब्धिसमः२० अनुपलब्धिसमः२१ नित्यसमः२२ अनित्यसमः२३
कार्यसमः२४॥ इति॥ द्वाविंशतिनिग्रहस्थानानि॥ प्रतिज्ञाहानिः१ प्रति

शांतरं २ प्रतिज्ञाविरोधः ३ प्रतिज्ञासन्यासः ४ हेत्वंतरं ५ अर्थांतरं ६ निरर्थकं ७ अविज्ञातार्थकं ८ अपार्थकं ९ अप्राप्तकालं १० न्यून ११ अधिक १२ पुनरुक्तं १३ अननुभाषणं १४ अज्ञानं १५ अप्रतिभा १६ विक्षेप १७ मतानुज्ञा १८ पर्यनुयोज्योपेक्षणं १९ निरनुयोज्योपेक्षणं २० अपसिद्धांत २१ हेत्वाभासाः २२ इत्युद्देशप्रकरणं ॥ अथैतेषां क्रमतो लक्षणानि वक्ष्यामः तत्र प्रमाकरणं प्रमाणं ॥ तद्धितप्रकारकज्ञानं प्रमा ॥ व्यापारवदसाधारणकारणकरणं ॥ तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ॥ असाधारणत्वं च ॥ कार्यतावच्छेदकधर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकत्वं ॥ अनन्यथासिद्धं कार्यनियतपूर्ववृत्तिकारणं ॥ अन्यथासिद्धिः पंचविधा ॥ ॥३॥

पंचविधा ॥ तत्र प्रथमा यथा ॥ कार्यं प्रति कारणस्य पूर्ववृत्तित्वं येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धं ॥ यथा घटं प्रति दंडः ॥ द्वितीया यथा यस्य कार्यं प्रति स्वातंत्र्येणान्वयव्यतिरेकौ नस्तः किंतु कारणं गृहीत्वैवान्वयव्यतिरेकौ गृह्येते तत्कार्यं प्रति तदन्यथासिद्धं ॥ यथा घटं प्रति दंडरूपं ॥ तृतीया यथा ॥ अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यनन्यथासिद्धत्वं ॥ यथा घटं प्रति कारणस्य ॥ चतुर्थी यथा ॥ तत्कार्यजनकं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तत्कार्यं प्रत्यन्यथासिद्धं ॥ यथा कुलालपितृ घटादिकं प्रति ॥ पंचमी यथा ॥ अवश्यकृत्सनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धं ॥ अत एव प्रयत्नेमत्वं [illegible] कारणमनन्यथासिद्धं

चुमन्यथासिद्धं॥ प्रागभावप्रतियोगिकार्यं॥ इंद्रियार्थसंनिकर्षजन्यंज्ञा
नंप्रत्यक्षं॥ तद्द्विविधं॥ निर्विकल्पकंसविकल्पकंचेति॥ तत्रनिष्प्रकार
कंज्ञाननिर्विकल्पकं॥ सप्रकारकंज्ञानंसविकल्पकं॥ यथादित्थोय
ब्राह्मणोयंध्यामोयमिति॥ प्रत्यक्षज्ञानहेतुरिंद्रियार्थसंनिकर्षःषड्विधः
संयोगः संयुक्तसमवायः॥ संयुक्तसमवेतसमवायः॥ समवायः॥ स ॥४॥
मवेतसमवायः॥ विशेषणविशेष्यभावश्चेति॥ चक्षुषाघटप्रत्यक्षज
नने संयोगः संनिकर्षः॥ घटरूपप्रत्यक्षेसंयुक्तसमवायः॥ रूपत्वसा
मान्यप्रत्यक्षेसंयुक्तसमवेतसमवायः॥ शब्दप्रत्यक्षजनने समवायः
संनिकर्षः॥ शब्दत्वसामान्यप्रत्यक्षेसमवेतसमवायःसंनिकर्षः॥

अभावप्रत्यक्षेविशेषणविशेष्यभावश्चेति॥ ज्ञानाकरणकंज्ञानंव
प्रत्यक्षं॥ इतिप्रत्यक्षं॥ अनुमितिःकरणमनुमानं॥ परामर्शजन्यंज्ञान
मनुमितिः॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानंपरामर्शः॥ साध्यसमा
नाधिकरणयतोभावोव्याप्तिःसाध्यसामानाधिकरण्यंहेतोर्व्या
प्तिः॥ व्याप्तिज्ञानंकरणं॥ परामर्शोव्यापारः॥ अनुमितिःफलंस्मृतं॥ अत्र
तत्त्रिविधं॥ कारणलिंगकं॥ कार्यलिंगकं॥ कार्यकारणभिन्नलिंग
कंचेति॥ तत्रपिपीलिकासंचारेणवृष्त्यनुमानंकारणलिंगकं॥ न
दीरध्यावृष्त्यनुमानंकार्यलिंगकं॥ पृथ्वीतेनद्रव्यत्वानुमानंकार्य
कारणभिन्नलिंगकं॥ पुनस्तत्रिविधं॥ अन्वयव्यतिरेकिकेवलान्व

यिकेवलव्यतिरेकिभेदात्॥अन्वयेनव्यतिरेकेणचव्याप्तिमदन्वयव्यतिरेकि॥यथावृक्षोसाध्येधूमवत्व॥अन्वयमात्रव्याप्तिकेकेवलान्वयियथावाच्येसाध्येप्रमेयत्व॥व्यतिरेकव्याप्तिकेकेवलव्यतिरेकि॥यथापृथ्वीमितरभेदेसाध्येगंधवत्त्वात्॥नस्तद्विविधंस्वार्थपरार्थभेदात्॥ यत्तुकश्चिन्महानसादौवन्हिधूमयोःभूयःसहचर्यदर्शनेन व्याप्तिंगृहीत्वापर्वतसमीपंगतःतत्रधूमंपश्यन्नव्याप्तिंस्मरतियत्रधूमस्तत्रवन्हिरितितदनंतरंवन्हिव्याप्यधूमवानयमितिज्ञानंपरामर्शाख्यंजायतेततःपर्वतोवन्हिमानितिसानुमितिाख्यंज्ञानंजायतेतदेतत्स्वार्थानुमानं॥परार्थानुमानमग्रेवक्ष्यते॥ ॥५॥ ॥५॥

उपमितिकरणमुपमानं॥संज्ञासंज्ञिसंबंधज्ञानंउपमितिः॥साद्विविधा॥साधर्म्योपमितिर्वैधर्म्योपमितिभेदात्॥साधर्म्योपमितिर्यथा॥कश्चिद्वयशब्दार्थमजानन्कुतश्चिदारण्यकात्पुरुषाद्गोसदृशोगवयशब्दवाच्यइतिश्रुत्वावनंगतःतत्रगोसदृशंपिंडंपश्यन्वाक्यार्थंस्मरति॥ततःअयंगवयशब्दवाच्यइत्युपमितिरुपजायते॥वैधर्म्योपमितिर्यथा॥दीर्घग्रीवादिपश्वेतरवैधर्म्यज्ञानादुष्ट्रकरभपदवाच्यतायाःग्रहणस्येया॥अत्रसादृश्यंज्ञानंकरणं॥अतिदेशवाक्यार्थस्मरणंव्यापारः॥संज्ञासंज्ञिसंबंधज्ञानंउपमितिःफलं॥इत्युपमानं॥आप्तोपदेशःशाब्दः॥आप्तस्तुयथार्थवक्ता॥वाक्यंपदसमूहः॥यथादंडेनशुक्लोगामानयेति॥आकांक्षायोग्यतासंनिधयोवाक्यार्थज्ञानेहेतवः॥तत्रपदस्यपदांतरव्यतिरेकप्रयुक्तोनुभावक

BHANDARKAR ORIENTAL RESEARCH INSTITUTE

लुमाकांक्षा॥ अर्थाबाधोयोग्यता॥ पदानामविलंबेनोच्चारणंसन्निधि
आकांक्षादिरहितंवाक्यंनप्रमाणं॥ यथागौरश्वःपुरुषःहस्तीयादिनप्र
माणं॥ आकांक्षाविरहात्॥ अग्निनासिंचेदितिनप्रमाणं॥ योग्यताविर
हात्॥ ग्रहरग्रहरेअसंहोचारितानिगामानयेत्यादिनप्रमाणं॥ सन्निधि
विरहात्॥ अत्रपदज्ञानकरणं॥ दृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थो
पस्थितिर्व्यापारः॥ वाक्यार्थज्ञानंफलं॥ वृत्तिर्नामशक्तिर्लक्षणान्यत
रूपा॥ अस्मात्सादृश्यमर्थोबोध्यश्चीश्वरसंकेतःशक्तिः॥ शक्यसं
बंधोलक्षणा॥ सादिविधा॥ गौणीशुद्धाचेति॥ गौणीनामसादृश्यवि
शिष्टलक्षणा॥ यथासिंहोमाणवकइत्यादौ॥ शुद्धापित्रिविधा॥ ज
हल्लक्षणा॥ अजहल्लक्षणा॥ जहदजहल्लक्षणाचेति॥ तत्रलक्षितावच्छे

इत्रगंगायांघोषःस्युतीरे लक्षणा

कस्वरूपेणलक्ष्यमात्रबोधिकाजहल्लक्षणा॥ यथागंगायांघोषः॥ लक्ष्यता
वच्छेदकस्वरूपेणलक्ष्यशक्योभयबोधप्रयोजिकाअजहल्लक्षणा॥ यथा
काकेभ्योदधिरक्षतामित्युक्तेकाकपदस्यदध्युपघातकेलक्षणा॥ जु
हदजहल्लक्षणाचेदातीनामेतेसोयंदेवदत्तइत्यादौतत्त्वंपदार्थयो
र्भागत्यागलक्षणा॥ शब्दोद्विविधः॥ वैदिकोलौकिकश्च॥ वैदिकेश्वरोक्तत्व
सर्वएवप्रमाणं॥ लौकिकःआप्तोक्तःप्रमाणमितिशब्दप्रकरणं॥ प्रमा
णलक्षणप्रकरणंसमाप्तं॥ अथप्रमेयलक्षणप्रकरणं॥ अतिव्याप्त्यव्याप्ति
संभवदोषरहितोऽसाधारणोधर्मोलक्षणं॥ तत्राद्यलक्ष्यवृत्तित्वमतिव्या
प्तिः॥ यथागोःशृंगित्वं॥ लक्ष्यैकदेशावृत्तित्वमव्याप्तिः॥ यथागोःकपिल
त्वं॥ लक्ष्यमात्रावर्तमानसंभवः॥ यथागोरेकशफत्वं॥ एतेषांनिष्कृष्टलक्षण

तु॥ लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छि
न्नप्रतियोगिताभेदसामानाधिकरण्यमतिव्याप्तिः॥ अव्याप्तिस्तु लक्ष्य
तावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकसामाना
धिकरणात्यन्ताभावप्रतियोगित्वमव्याप्तिः॥ असंभवस्तु॥ लक्ष्यता
वच्छेदकव्यापकीभूताभावप्रतियोगित्वं॥ यस्य लक्षणं तल्लक्ष्यम्भ
वति॥ तद्गतधर्मः लक्ष्यतावच्छेदको भवति॥ यथा गन्धवत्पृथ्याः
लक्षणं॥ लक्ष्यं पृथ्वी॥ पृथ्वीत्वं लक्ष्यतावच्छेदकं॥ पृथ्वीलक्ष्य
तावच्छेदकावच्छिन्नाभवति॥ तथैवेत्सवं लक्षणेषुरूपेयं
प्रमिति विषयप्रमेयमितिप्रमेयसामान्यलक्षणं॥ प्रमितिलक्षणयुक्तं
विषयलक्षणवदयात्॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि॥

इति प्रमेयं॥

पूर्वकृतस्मरणाधर्मि
रूपसहकारिभावात्तस्य शरीरस्यैति

अथवा इच्छाप्रयत्नज्ञानानि सामान्यत्र लक्षणं॥ सुखविषयिणीच्छा
दुःखविषयोद्वेषः॥ अनुकूलवेदनीयं सुखं॥ प्रतिकूलवेदनीयं दुः
खं॥ सर्वव्यवहारहेतुर्ज्ञानं॥ चेष्टेन्द्रियार्थाश्रयः शरीरं॥ अत्रचेष्टा
दीनामाश्रयपदेभेदत्रयाणि लक्षणानि वाक्यानि॥ अत्रप्रयत्नज
न्यतावच्छेदकोजातिविशेषः॥ इन्द्रियार्थयोर्लक्षणंवक्ष्यमाणं॥ प्रत्य
क्षज्ञानकरणमिन्द्रियं॥ तानिघ्राणरसनचक्षुत्वक्श्रोत्रभेदात्पञ्च
विधानि दृष्टप्रकृतिकानि भवंति॥ तत्रगंधग्राहकं घ्राणं नासाव
र्ति॥ रसग्राहकमिन्द्रियं रसनं जिह्वायवर्ति॥ रूपग्राहकमिन्द्रियं
चक्षुः कृष्णतारायवर्ति॥ स्पर्शग्राहकमिन्द्रियं त्वक्सर्वशरीरवर्ति॥

इंद्रियं
तच्चभौतिकं सर्वं
गुणाश्रयत्वात्॥

द्रव्याद्यकमिंद्रियं श्रोत्रं॥ बहिरिंद्रियग्राह्यविशेषगुणवंति भूतानि॥ तानि पृथिव्यप्तेजोवाय्वाकाशभेदात्पंचविधानि भवंति॥ तत्र गंधवती पृथ्वी॥ रसवत्य आपः॥ उष्णस्पर्शवत्तेजः॥ रूपरहितस्पर्शवान्वायुः॥ शब्दगुणकमाकाशः॥ बहिरिंद्रियविशेषगुणाः अर्थाः विषयापरपर्यायाः॥ तद्गंधरूपरसस्पर्शशब्दभेदात्पंचविधाः भवंति॥ तत्र घ्राणग्राह्यो विषयो गंधः॥ रसनग्राह्यो विषयो रसः॥ चक्षुर्ग्राह्यो विषयो रूपं॥ त्वङ्मात्रग्राह्यो विषयः स्पर्शः॥ श्रोत्रग्राह्यो विषयः शब्दः॥ बुद्धेर्लक्षणमुक्तं॥ सुखादिसंवेदनं लब्धिसाधनमिंद्रियं मनः॥ रागाद्यनुत्पत्तिः॥ सा द्विविधा॥ कारणरूपा कार्यरूपा च॥ तत्र वाङ्मनःशरीरारंभरूपा पूर्वा॥ धर्मा

ग्राह्यः ॥८॥

॥८॥

तच्छरीरसंबंधनिमित्तं॥

तच्छरीरसंबंध एवेति भावनीयं॥

धर्मसिद्धिकाप्रवृत्तिरुत्तरा॥ लौकिकप्रत्यक्षविषयप्रमोत्पत्तिजनकदोषाः॥ तद्रागद्वेषमोहभेदात्त्रिविधाः॥ तत्र छाजनको रागः॥ द्वेष उक्तः॥ ॥ पुनरुत्पत्तिः प्रेत्यभावः॥ जन्ममरणासुकः अनादिरूपवर्गतोऽप्रवृत्तिदोषजनितोऽर्थः फलं॥ तद्द्विधं॥ मुख्यं गौणं चेति॥ तत्र सुखदुःखान्यतरसाक्षात्कारस्वरूपं मुख्यं फलं॥ शरीरादिकं गौणं फलं॥ पीडास्वरूपं दुःखं॥ दुःखासंताभावोमोक्षः इति प्रमेयलक्षणप्रकरणं॥ एकस्मिन्धर्मिणि विरोधेन भावाभावप्रकारकज्ञानं संशयः॥ सः कुत्रचित्साधारणधर्मधीर्नास्तीति तथा असाधारणधर्मधीर्नास्तीति॥ यथा स्थाणौ वा पुरुषो वेति॥ कुत्रचिद्विरुद्धकोटिद्वयोपस्थापकशब्दात्तु भवति॥ यथा वादिप्रतिवादिनोः

विविध

तस्यासंनियमेसिद्धिर्भवति

यथा मनसश्चिंत्यं ६ यथाजी सा[illegible]नुद्दो नरः

शब्दश्रवणानध्यस्यसंशयः॥ कुत्रचिज्ज्ञानव्यतिरेकज्ञानयोरव्यवस्थातश्च्यवति॥ प्रामाण्यसंशयाऽवर्ती सर्थः॥ सतु विशेषदर्शनादिवर्यः॥ यमर्थमुद्दिश्यप्रवर्तते तत्प्रयोजनं॥ तद्द्विविधं॥ मुख्यंगौणं चेति॥ तत्र सुखदुःखाभावरूपंमुख्यंप्रयोजनं॥ तद्व्यंसुखादिगौणं॥ प्रतिपाद्यप्रतिपादयोर्यस्मिन्नर्थेबुद्धिसाम्यंदृष्टांतः॥ शास्त्रितार्थनिश्चयःसिद्धांतः॥ सर्वशास्त्राविरुद्धःस्वशास्त्रैकदेशःसर्वसिद्धांतः॥ न्यायतोवादिप्रतिवाद्यभ्युपगतःकथनंकृत्स्नोर्थःसर्वसिद्धांतः॥ स्वशास्त्रैभ्यु ॥६॥ एवा

पगतोर्थः॥ प्रतितंत्रसिद्धांतः॥ यःसिद्धोऽन्यत्रकरणसिद्धिःसोधिकरणसिद्धांतः॥ यथाक्षिसादिकंपक्षीकृत्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वेसाध्यमानेसर्वज्ञत्वमीश्वरस्य॥ साक्षादस्त्रिता

यथाऽमी मांसकर्तारः शब्दनित्यत्वे॥२

भ्युपगमोऽभ्युपगमसिद्धांतः॥ यथामनसइंद्रियत्वं॥ साध्यनिर्देशःप्रतिज्ञा॥ अस्यानिष्कृष्टलक्षणंतु॥ न्यायतर्कतत्वेसतिप्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयताविशेषणविषयताकबोधजनकत्वेसतिप्रकृतपक्षेप्रकृतसाध्यबोधजनकत्वं॥ उदाहरणसाधर्म्यवैधर्म्याभ्यांसाध्यसाधनंहेतुः॥ अत्रसाधर्म्यवैधर्म्यशब्दाभ्यामन्वयव्यतिरेकावुक्तौ॥ साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वेनपक्षकत्वबोधकःसाध्यान्वितस्यार्थबोधकोवयवोहेतुरितिसूत्रार्थः॥ दृष्टांतउदाहरणं॥ तद्द्विविधं॥ अन्वयीव्यतिरेकीच॥ प्रकृतोदाहरणोपदर्शित्वासविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोन्यायावयवउपनयः॥ सद्विविधः॥ अन्वयीव्यति

रकीच॥ तथेतिसाध्यस्योपसंहारेऽन्वयोपनयः॥ नतथेति साध्यस्यो
पसंहारोव्यतिरेकोपनयः॥ हेतुकथनाद्धीतिशायाःपुनर्वचनंनिग
मनं॥ व्याप्तिपक्षधर्महेतुकथनपूर्वकंसाध्यविशिष्टपक्षप्रदर्श
कंव्याप्तिपक्षधर्महेतुशाप्यसाध्यविशिष्टपक्षबोधकस्तादृशसा
ध्यबोधकोवान्योयोवयवोनिगमनं॥ इदमेवपञ्चावयववाक्यप
रार्थानुमानमित्युच्यते॥ तथाहिकश्चिद्धूमादग्निमनुमीय परप्रतिपत्त्य
र्थंपञ्चावयववाक्यंप्रयुंक्ते॥ पर्वतोवह्निमान्॥ धूमवत्त्वात्॥ योयो ॥१०॥
धूमवान्ससवह्निमान्यथामहानसः॥ तथाचायं॥ तस्मात्तथेति
तत्रपर्वतोवह्निमानितिप्रतिज्ञा॥ धूमवत्त्वादितिहेतुः॥ योयोधूमवा
न्नियुदाहरणं॥ तथाचायमितिउपनयः॥ तस्माच्चतथेतिनिगमनं॥

आत्माश्रयातत्वेर्थेनुज्ञानार्थं व्याप्यारोपेणव्यापकारोपस्तर्कः यथायंनिर्व चक्रक
न्हिःस्यात्तदानिर्धूमःस्यात्॥ सचायंमात्माश्रयान्योन्याश्रयोनवस्था
कक्कतदन्यवा॥ धेतार्थप्रसंगभेदात्सचविधः॥ तत्रस्वस्यस्वापेक्षेत
रनिरूपप्रसंगोऽन्याश्रयः॥ सचउत्पत्तौस्थितौव्याप्तिद्वारात्रेधा॥ यथा तत्रोत्पत्तिद्वा
अयंघटःएतद्रव्यघटजन्यःस्यादेतत्स्थानाधिकरणक्षणोत्तरवर्तिन
स्यात्॥ स्थितिद्वारायथायद्ययंघटएतद्घटवृत्तिःस्यात्तदाएतद्घट्याप्यो
नस्यात्॥ व्याप्तिद्वारान्याश्रययथा॥ यद्ययंघटएतद्घटज्ञानाभिन्नःस्या
त्तदाज्ञानसामग्रीजन्यःस्यात्॥ एतद्घटाभिन्नःस्यादितिवा॥ तदपेक्षाचेत्त
दनिबंधनोऽनिरूपप्रसंगोऽन्योन्याश्रयः॥ सोपिपूर्ववत्त्रेधा॥ तदपेक्षापेक्षे
दनिबंधनोऽनिरूपप्रसंगःचक्रक॥ अस्यापिपूर्ववत्त्रैविध्यं॥ अथवास्थितप

रुपसोपाधीनानिदृष्टप्रसंगः अनवस्था॥ यथायदि घटत्वं घटजन्यत्वव्याप्यं स्यात्॥ कपालसमवेतव्याप्यं न स्यात्॥ तदन्यबाधितार्थप्रसंगस्तु धूमो यदि वह्न्यभिचारी स्यात्तदावह्निजन्यो न स्यात्॥ प्रथमोपस्थितौ लघ्वविनिगमनाविरहलाघवगौरवाद्यारेकेतुप्रसंगानास्कंदन्नप्रकृतार्थ- ॥१९॥ कितुप्रमाणसहकारित्वसाधर्म्यात्तथाव्यवहारः॥ संदिग्धपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः॥ प्रमाणतर्कसाधनदूषणावयवसिद्धान्ताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः॥ प्रमाणतर्कसाधनदूषणछलजातिनिग्रहस्थानसाधनोपालंभोजल्पः॥ स्वपक्षस्थापनाहीनावितंडा॥ यादादित्रयंकथमुच्यते॥ कथाधिकारिणस्तत्त्वनिर्णयविजयान्यतराभिभाषिणः सर्वजनसिद्धानुभवानपह्नविनः॥ श्रव- ॥१९॥

णपटवः अकल्पकारिणः कथौपयिकव्यापारसमर्थाश्रितिकाथिताः॥ तन्मध्येयादाधिकारिणस्तत्त्वबुभुत्सवः प्रकृतोक्तिकाः अविप्लंभकाः यथाकालस्फुर्तिकाअनाक्षेपकायुक्तिसिद्धप्रसंतारशीलकाथिताः॥ एवंसभ्यपुरुषमध्यस्थादीनालक्षणानुद्धानेः॥ पंचावयवरूपोपपन्नाभावेसतिहेतुरूपेणाभासमानंहेत्वाभासत्वं॥ तत्रानैकांतिकः सव्यभिचारः सत्रिविधः॥ साधारणाधारणानुपसंहारिभेदात्॥ तत्रसाध्याभाववृत्तिः साधारणः यथाशब्दोनित्यः अस्पर्शत्वात् अस्पर्शत्वंकर्मणिअनित्येवर्तते॥ सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः असाधारणः यथाशब्दोनित्यः शब्दत्वात्॥ शब्दत्वंहिसर्वेभ्यो नित्येभ्योव्यावर्त्तंऽनित्येभ्योव्यावर्त्तशब्दमात्रवर्त्ति॥ अन्वयव्यतिरेक

पक्षेपक्षतावच्छेदकाभावः आश्रयासिद्धः ॥ पक्षेहेतुतावच्छेदकस्याभावः सोपाधिकोव्याप्यत्वासिद्धः

दृष्टांतरहितोऽनुपसंहारी ॥ यथा सर्वंनेत्रप्रमेयत्वात् ॥ अत्र सर्वस्यपक्षत्वाद्दृष्टांतो नास्ति ॥ साध्याभावव्याप्तोहेतुर्विरुद्धः ॥ यथा शब्दोनित्यः कृतकत्वात् ॥ कृतकत्वंहि नित्यत्वाभावेनानित्यत्वेनव्याप्तं ॥ साध्याभावसाधकत्वंतस्य यस्मात्सत्प्रतिपक्षः ॥ यथा शब्दोनित्यः श्रावणत्वात् ॥ शब्दः अनित्यः कृतकत्वात् ॥ असिद्धस्त्रिविधः ॥ आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ॥ तत्राश्रयासिद्धो यथा ॥ गगनारविंदसुरभि ॥ अरविंदवत्त्वात् सरोजारविंदवत् ॥ स्वरूपासिद्धो यथा ॥ शब्दोगुणः चाक्षुषत्वात् अत्रचाक्षुषत्वंशब्दे नास्ति ॥ व्याप्यत्वासिद्धो यथा ॥ पर्वतोधूमवान् ॥ वह्निमत्त्वात् ॥ अत्रयत्रयत्रवह्निस्तत्रतत्रधूमइतिनास्ति ॥ अयोगोलकेधूमाभावात् ॥ यस्यसाध्यंप्रमाणांतरेणबाध्यते ॥ सबाधितः ॥ यथाग्नेः

साध्यव्यापकसाधनाव्यापकः उपाधिः

DR BHAU DAJI MEMORIAL

॥१२॥

अनुष्णः पदार्थत्वात् ॥ अत्रस्पर्शत्वेनानुष्णाभावउष्णत्वंघटते ॥ वाद्यभिमतार्थांतरकल्पनंछलं ॥ वक्तात्पर्यविषयार्थकल्पनेनदूषणाभिधानंवाछलं ॥ तात्पर्यविषयस्तु ॥ विशेष्यविशेषणसंसर्गेण ॥ यथानेपालादागतोयंनवकंबलत्वात्यत्रनवसंख्यापरत्वकल्पनयासिध्यभिधानं ॥ इदंप्रमेयंधर्मत्वात्यत्रउक्तार्थकल्पनयाभागासिध्यभिधानं ॥ तथा वह्निमान्धूमादित्यत्रधूमादयवेव्यभिचारादिभिधानं ॥ अविशेषाभिहितेऽर्थेवक्तुरभिप्रायादर्थांतरकल्पनयावाकूछलं ॥ यथानेपालादागतोयंनवकंबलत्वादित्युक्तेकुतोस्यनवसंख्याकांकंबलाः ॥ तथागोविषाणीत्युक्तेकुतोबाणस्यविषाणंतथागजोविषाणीत्युक्तेकुतोगजस्यशृंगं ॥ इत्यादिकमुच्यं ॥ संभवतोर्थस्यातिसामान्ययोगादसंभूतार्थकल्पनासा

बो०

मान्यछलं॥ यथायंब्राह्मणःविद्यावरणसंपन्नस्तुक्तोब्राह्मणत्वेनविद्यावरणसंप
न्नत्वंसाधयतीत्यन्यथापरोवदतितुक्तोब्राह्मणत्वेनविद्याचरणसंपन्नत्वं॥ श
क्तिलक्षणयोरेकतरव्याप्तुक्तेशब्देशब्दंतरपरव्याप्तायःप्रतिषेधःस
उपचारच्छलं॥ यथामंचाःक्रोशंतिनीलोघटइत्यादौमंचस्थाएवक्रोशंति
नतुमंचाएवघटस्यकथंनीलरूपाभेदः॥ व्याप्तिनिरपेक्षंसाधर्म्यवैध
र्म्याभ्यांदूषणाभेधानंजातिः॥ तत्रवादिनाऽन्वयेनव्यतिरेकेणवासाध्येसा
॥१३॥ धितेप्रतिवादिनासाधर्म्यमात्रप्रवृत्तहेतुनातद्भावापादनंसाधर्म्यसमा॥एवं ॥१३॥
वैधर्म्यमात्रप्रवृत्तहेतुनासाध्याभावापादनंवैधर्म्यसमा॥तत्रसाधर्म्यसमा
यथाशब्दोऽनित्यःकृतकत्वात्घटवत्व्यतिरेकेणव्योमवदितिएवंवादिना
साध्येसाधितेसतिप्रतिवाद्याह॥नैतदेवयदिअनित्योघटस्साधर्म्यात्शब्दश्चे

साधिते

त्तर्हिआकाशसाधर्म्यादमूर्तत्वान्नित्योघटःस्यात्॥वैधर्म्यसमायथा॥पूर्ववद्वा
दिनाव्यतिरेकेणशब्दानित्यत्वेसतिप्रतिवाद्याह॥यदिनित्याकाशवैधर्म्यात्शब्दो
अनित्यश्चेत्तर्हिअनित्यघटवैधर्म्यादमूर्तत्वान्नित्यःशब्दःस्यात्॥व्याप्तिपु
रस्कृत्यसाध्यदृष्टान्तान्यतरस्मिन्साध्यसाधनान्यतरेणाविद्यमानधर्मा
रोपःउत्कर्षसमा॥यथाशब्दोनित्यःकृतकत्वादितिस्थापनायांअनित्यत्वंकृ
तकत्वंचघटेरूपसहचरितंअतःशब्देपिरूपवान्स्यात्॥इत्येविरूढदू
शनाभासा॥एवंश्रावणशब्दसाधर्म्यात्कृतकत्वाच्छब्देपिश्रावणस्यात्॥ असिद्धिदेश
पक्षदृष्टान्तान्यतरस्मिन्व्याप्तिमपुरस्कृत्यसहचरितधर्मभावेनहेतुसा नाभासा
ध्यान्यतराभावप्रसंजनमपकर्षसमा॥यथाशब्दोऽनित्यःकृतकत्वादित्यु
क्तेयदिअनित्यत्वंसहचरितघटधर्मोकृतकत्वादनित्यःशब्दस्तदाकृतकत्वा

नित्यत्वसहचरितघटधर्मरूपत्वव्यावृत्तौ शब्दे कृतकत्वस्यानित्यत्वस्यव्यावृत्तिः स्यात्॥ एवं शब्दे कृतकत्वसहचरितश्रावणत्वस्यासंयोगिद्रव्यादावनित्यत्वकृतकत्वसहचरितगुणत्वस्यव्यावृत्तौ घटेऽनित्यत्वं कृतकत्वंचव्यावर्तेत॥ दृष्टान्तेसाध्यसाधनवैकल्यदृष्टान्ताभासौ वेदितव्यौ॥ दृष्टान्ते संदिग्धसाध्यकत्वस्यापादनंवर्ण्यसमा॥ यथा शब्दोनित्यत्वात्॥ घटवत्इत्यत्रघटेपिकृतकत्वंसंदिग्धसाध्यव्यावृत्तिस्वीकार्यनस्वीकर्तव्येनदोषगमकत्वेवाभावाद्साधनविकलोदृष्टान्तः स्यात् ॥१४॥ असाधारणदृष्टान्ताभासावेदितव्यौ॥ पक्षेतुल्यसंदिग्धतापादनंअवर्ण्यसमा॥ यथा शब्दोऽनित्यश्चक्षुषत्वात्यथाघटोऽनित्यश्चक्षुषत्वात्साध्यंनिश्चितमस्तितथाशब्देपिघटसाम्यान्निश्चेतुंसाध्यंवक्तव्यं॥ उक्तेचेत्संदिग्धसाध्यत्वंपक्षेसिद्धं न स्यात्॥ नोक्तेचेद्दृष्टान्तसाम्यंन स्यात्॥ अतोसिद्धोदृष्टान्ताभासः॥ कस्यचिद्धर्मस्यकुत्रचिद्व्यभिचारदर्शनेनधर्मत्वविशेषात्प्रकृतहेतोः प्रकृतसाध्यप्रतिव्यभिचारापादनंविकल्पसमा॥ यथा शब्दोनित्यःकृतकत्वादित्यत्रकृतकत्वस्यकुत्रचिद्व्यभिचारदर्शनात्कुतश्चित्स्यानित्यत्वव्यभिचारदर्शनाद्नित्यत्वस्यमूर्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात्कृतकत्वमपिनित्यत्वंव्यभिचरेत्॥ अनैकान्तिकदृष्टान्ताभासावेदितव्यौ॥ पक्षदृष्टान्तादुःप्रकृतसाध्यतुल्यतापादनंसाध्यसमा॥ यथा शब्दोऽनित्यश्चक्षुषत्वात्यथाऽनित्यत्वंसाध्यंतथाशब्देपिसाध्यंयदिपूर्वंशब्दःसिद्ध्येत्तदाऽनुमितिविषयत्वंनस्यात्॥ पूर्वंमसिद्धश्चेत्सुधादेरदृष्टान्ताद्आश्रयासिद्धः॥ आश्रयासिद्धौदृष्टान्ताभासावेदितव्यौ॥ प्राप्यविशेषादनिष्टापादनेनप्रत्यवस्थानंप्राप्तिसमा॥ यथाशब्दोऽनित्यःकृतकत्वादित्यत्रकृतकत्वस्यहेतोःअनित्यत्वंप्राप्ययदिसाध्यतितर्हिप्राप्तौविशेषःकिंकस्यसाधकंस्यात्॥ अतिकूलतर्कदृष्टान्ताभासावेदितव्यौ॥ अप्राप्यसाधकत्वादनिष्टापादनेनप्रत्यवस्थानेनप्राप्तिसमा॥ यथाधूमोदाहरणेकृत

कल्पहेतुरनित्यत्वप्राप्यसाधयतिचेत्प्राप्यसाधकत्वेतिन्नसंगात्॥ प्रति
कूलतर्कदेशनाभासेयं॥ दृष्टांतस्याप्रमाणेनदेशासंबंधस्थानंप्रसंगसमा॥ यथा
शब्दोऽनित्यःकृतकत्वादित्यत्रघटादिर्दृष्टांतोऽस्तित्रप्रमाणंवाच्यंतत्रास्तिचेत्त
त्रमाणेप्यन्यंप्रमाणंवाच्यंएवंचानवस्थायातासेयं॥ एवंदृष्टांतेदृष्टांतांतरंवाच्यं
हेतौहेत्वंतरमित्यनवस्थोद्या॥ अनवस्थादेशनाभासेयं॥ प्रतिदृष्टांतेनप्रत्य
वस्थानंप्रतिदृष्टांतसमा॥ पूर्ववदाहरणेयदिदृष्टांतबलेनानित्यःशब्दस्तदाकाश ॥१५॥
यथा
॥१५॥ दृष्टांतबलेननित्यःकिंनस्यात्॥ बाधप्रतिरोधान्यतरदेशनाभासेयं॥ साधनं
गपक्षहेतुदृष्टांतानामुपन्यासेःप्राक्तदेवंभावस्यनुपलब्धिप्रत्यवस्थानमनुपलब्धि समा
यथाघटोमूर्तिमान्गंधवत्तत्पटवत्तथोपलब्धेर्गंधोपलब्धेश्चपूर्वंहेतुभा
वादसिद्धिः॥ पटश्चगंधोपलब्धेःपूर्वंहेतुभावेनदृष्टांतासिद्धिः॥ असिद्धिदेश

नाभासेयं॥ समानधर्मदर्शनाद्यत्किंचित्संशयकारणबलात्संशयेनप्रत्यव
स्थानंसंशयसमा॥ यथाशब्दोऽनित्यःकामंकृतकत्वात्घटवदित्युक्तेसामान्येगो
दादौदृष्टांतेघटेचेंद्रियकत्वंतुल्यं॥ तथाचयथाकार्यत्वान्नित्यत्वंनिर्णीयतेतथाऽनित्य
त्वंनिर्णीयतेतथाऽनित्यत्वसाधर्म्यादनित्यत्वसिद्धौतां॥ सप्रतिपक्षदे
शनाभासेयं॥ आरोपितप्रमाणांतरेणबाधेनप्रत्यवस्थानंप्रकरणसमा॥
यथाशब्दोऽनित्यःकृतकत्वादित्युक्तेनैतदेवंश्रावणत्वेनविपक्षबाधकेन
बाधात्बाधदेशनाभासेयं॥ कालसंबंधखंडनेनाहेतुतयाप्रत्यवस्थान
महेतुसमा॥ अयमर्थः दंडादिकंघटादेर्नपूर्ववर्तितयाकारणंतदानींघटो
त्पत्तेःकस्यकारणंस्यादतएवनघटाद्युत्तरकालवर्तितयापिनवासमानका
लवर्तितयापिसव्येतरविषाणयोरिवविनिगमनापत्तेः॥ प्रतिकूलतर्कदेश

नाभासेयं॥ अर्थापत्त्याभासेनप्रतिपक्षसाधनायप्रयुक्तस्थानं अर्थापत्तिसमा॥ यथाच शब्दोऽनित्यः शब्दादन्यनित्यमित्यर्थापद्यते॥ तथाच दृष्टांतसिद्धिः॥ एवंकृतकत्वंसाधनायोक्तेऽनित्यशब्दे अर्थापद्यतेऽन्यस्माद्धेतोर्नित्यः॥ सर्वदोषदेशनाभासाचेयं॥ सन्मात्रश्चेतनधर्मेणात्मविशेषापादनं अविशेषसमा॥ यथाशब्दः अनित्यः कृतकत्वादित्यत्रैकस्यधर्मस्य कृतकत्वादेः शब्दघटयोरविशेषमुच्यतेतदासन्मात्रस्यधर्मः सत्वप्रमेयत्वादयस्तेषांसर्वत्रसत्वात्सर्वेषामभेदःस्यात्तदापक्षाद्यविशेषभागः॥ प्रतिकूलतर्कदेशनाभासेयं॥ व्याप्तिमपुरस्कृत्ययत्किंचिद्दृष्टांतेनपरदृष्टांतेनस्वपक्षसाधनेनप्रत्यवस्थानंउपपत्तिसमा॥ यथाशब्देऽनित्यः कृतकत्वात्॥ यथाघटेऽनित्यत्वेप्रमाणमस्तितथाप्रसक्षेऽपिसप्रमाणकः॥ घटसक्ष

॥१६॥ ॥१६॥

घटसाधर्म्यात्तत्सत्वावर्त्तीत्यादिनानिर्दिष्टस्यसाधनस्याभावेपिसाध्यस्योपलंभात्प्रत्यवस्थानमनुपलब्धिसमा॥ यथापर्वतोवह्निमान्धूमादित्यादिकमवधारणार्थमुच्यतेनैतत्तेभवतिधूमंविनाआलोकादितोपिवह्निसिद्धेः॥ तथाचनधूमस्यसाधकत्वं॥ बाधदेशनाभासेयं॥ यदिपक्षविपरीतानुपलब्ध्याप्रत्यवस्थानमनुपलब्धिसमा अयंभावःनैयायिकेनशब्दानित्यत्वंसाध्यतेयदिशब्दोनित्यःस्यादुच्चारणात्प्राक्कुतोनोपलभ्यते॥ नहिघटाद्यावरणकुड्यादिवच्छब्दस्यावरणमस्तितदनुपलब्धेरितिप्रजातिवादीप्रत्यवतिष्ठते॥ यद्यावरणानुपलब्धेरावरणाभावःसिध्यतिनचावरणानुपलब्धेरप्यनुपलंभादावरणानुपलब्धेरप्यभावःसिध्येत्तथाचशब्दनित्यत्वमागतं॥ प्रतिकूलतर्कदेशनाभासेयं॥ व्याप्तिमपुरस्कृत्ययत्किंचिद्दृष्टांतात्साधर्म्येणसर्वस्यसाध्यत्वापादनमनित्यसमा॥ यथाशब्देऽनित्यत्वेयत्रदृष्टांतत्व

टसाधर्म्यो हृत कृतत्वेन सहतुल्यधर्मतोपपद्यते इयतः शब्देऽनित्यत्वं साध्यते तदा सर्वस्यानित्यत्वं स्यात्॥ सर्वत्र सदादिरूपसाधर्म्यसंभवात्॥ प्रतिकूलतर्कभासनेयं॥ नित्यसाधर्म्येण प्रयत्नस्थानंनित्यसमा॥ यथा शब्दोऽनित्यस्तत्र शब्दे अनित्यत्वस्य सर्वकालस्वीकारे शब्दोनित्यः स्यात् विरुद्धदेशनाभासेयं॥ सामान्यतउक्तेहेतावनाप्तमतविशेषनिराकरणेन प्रयत्नस्थानंकार्यसमा॥ यथाशब्दोऽनित्यः प्रयत्नानंतरीयकत्वादित्युक्ते प्रयत्नानंतरीयकत्वं प्रयत्नकार्यत्वं घटादौ प्रयत्नानंतरीयकत्वेलभ्यमाने कीलकादावपि दृश्यं॥ तत्रहितीयंनतज्जन्यत्वसाधकं आद्यंत्वसिद्धं॥ असिद्धिदेशनाभासेयं॥ इतिजातिविकल्पलक्षणं॥ विप्रतिपत्तिप्रतिपत्त्यन्यतरस्थानं॥ साधकधर्मवत्वंनिग्रहस्थानं॥ अत्रविप्रतिपत्तिर्विरुद्धदेशानंअप्रतिपत्तिःप्रकृताज्ञानं॥ स्वपक्षेपरपक्षधर्मान्यनुज्ञाहानिः॥ इयंपक्षहेतुदृष्टांतसाध्यतदन्यतानिभेदात्पंचधाभवति॥ तत्रयथा शब्दोऽनित्यः कृतकत्वादित्युक्ते प्रत्यभिज्ञयता धेतविषयमित्युक्तेअस्तुतर्हिदृढएवपक्षः॥ एवंतत्रैवेंद्रियकत्वादिति [redacted] हेतावनेकांतिकत्वादितिप्रयुक्तेअस्तुकृतकत्वादितिहेतुः॥ एवंपर्वतोवह्निमान्धूमात्अयोगोलकवदित्युक्तेदृष्टांतेसाधनविकल्पेनोत्तरितेअस्तुतर्हिमहानस्तवदिति॥ अत्रैवसिद्धसाधनेनप्रयुक्तेअस्तुतर्हिइंधनवानिति॥ अन्यथावैस्तुविशेषणहान्यादिः यथातत्रैवनीलधूमादित्युक्तेः समर्थविशेषणेनप्रयुक्तेअस्तुतर्हिधूमादितिहेतुः॥ प्रतिज्ञातार्थस्यप्रतिषेधेतद्दूषणादिधिर्ष्यया धर्मांतरविकल्पोत्तरंप्रतिज्ञांतरा॥ यथाशब्दोनित्यः ध्वनौवाधेतपरेणप्रयुक्तेअस्तुतर्हिवर्णसमकःशब्दःपक्षः॥ इदंचपक्षसाध्यभेदात्द्विवि

तरि

तर्हि

रयुक्ते

विशेषण

र्थं ॥ तत्र पक्षविशेषणमुक्तं ॥ साध्यविशेषणमुच्यते ॥ पर्वतोवह्निमान्नसुरा भिमलिनधूमवत्त्वादित्युक्ते असमर्थविशेषणत्वेनप्रयुक्ते कश्चिद्गुरुत्वभाववन्निमानित्युच्यते ॥ इदमुदाहरणांतरोपनयानंतराणांचोपलक्षणं ज्ञेयं ॥ तत्रोदाहरणांतरंयथा ॥ सुराभिमलिनवन्नो साध्ये यसुराधूमवान्सवान्निमानित्युदाहरणेन्यूनत्वेनप्रयुक्ते अस्तुनहिसुराभिमलिनवन्निमानिति ॥ एवमुपनयांतरनिगमनांतराणामप्युदाहरणमूह्यं ॥ कथायां स्ववचनाविरोधः प्रतिज्ञाविरोधः ॥ पर्वतोवह्निमान्नहेतात् ॥ स्वपक्षप्रतिषेधेतसिद्धिर्वा प्रतिज्ञासंन्यासः प्रतिज्ञातार्थापलापः ॥ यथाशब्दोनित्य ऐंद्रियकत्वादित्युक्ते सामान्येनाभिचारेणप्रयुक्ते एवमादिशब्दोनित्य इति ॥ अविशेषोक्तौ हेतौ प्रतिविधेयरोक्तदूषणोद्धिर्वा पूर्वोक्ते हेतावुच्छेदकातिरिक्तहेतावच्छेदकविशिष्टवचनंदेशांतरं ॥ यथाशब्दोनित्यः बाह्येंद्रियप्रत्यक्षत्वादित्युक्ते सामान्यशब्दानेका

तिकत्वेनप्रयुक्ते सामान्यवत्वेसतीतिविशेषणं ॥ एवंविधिश्चहेतुरुक्तोयः बाह्येंद्रियप्रत्यक्षः सजातिसमुदायेनूनत्वेनप्रयुक्ते विधिरुक्तिः एवमुपनयविशेषणेपि ॥ प्रकृतानाकांक्षितानाभेधानमनर्थांतरं ॥ यथाशब्दोनित्यश्चक्षुषत्वाशब्दोगुणः सर्वाकाशस्येत्यादि ॥ अथवाचकपदप्रयोगोनिरर्थकंयथाजबगडदशइत्यादिवत्सदप्रयोगः ॥ अवहितावि कलेसुसन्नपरिषत्तिवादिबोधानुकूलापेक्षेतज्ज्ञनकवाचकवाक्यप्रयोगःअविप्रतार्थंयथान्यायिकमीमांसकयोर्विचारेअन्यतरोबोधतंत्रपरिभाषयावदतिचेत्तदानिग्रहस्थानं ॥ आकांक्षायोग्यतासंनिधिरहितवाक्यप्रयोगःअपार्थकं ॥ एतदुदाहरणमुक्तं ॥ समसंबंधविषयीभूतकथाक्रमविपरीतक्रमेणाभिधानंअप्राप्तकालं ॥ तत्रायंक्रमः वादिनासाधनमुक्त्वासामान्यतोदोषाभासाउद्धरणीयाइत्येकः पादः प्रतिवादिनश्चतत्रोपालंभोद्वितीयः पादः

प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणं चतुर्थः पादः जयपराजयव्यवस्थाचतुर्थपादः एवं प्रतिज्ञादीनां क्रमः ज्ञातव्यः॥ एतद्विपरीतक्रमेणाभिधानमशास्त्रकालमित्यर्थः॥ हेतूदाहरणाधिक्यमधिकं॥ यथा पर्वतोवह्निमान्॥ धूमात्॥ आलोकात्॥ तथा महानसवत्॥ निश्चयोजननपुनरभिधानं पुनरुक्तं॥ तद्द्विविधं॥ शब्दपुनरुक्तं॥ अर्थपुनरुक्तं चेति॥ तत्र समानार्थपूर्वसमानानुपूर्वकशब्दप्रयोगः शब्दपुनरुक्तं॥ यथा घटो घटः॥ समानार्थकभिन्नानुपूर्विकशब्दस्य निश्चयोजनं पुनरभिधानं अर्थपुनरुक्तं यथा घटः कलशः इति॥ तद्द्विविधं॥ एकसमानार्थकेषु उक्तलक्षणं॥ द्वितीयं तु अर्थादापन्नस्य पुनरभिधानं॥ तत्पुनः पूर्वपक्षेऽपि किं उत्तरपक्षेऽपि किं उभयोरपि किं निषेधेऽपि किं भेदाच्चतुर्विधं॥ तत्र वह्निरुष्णा इति प्रथमं॥ उष्णो वह्निरिति द्वितीयं॥ [redacted]गेहे नास्ति बहिरस्तीति तृतीयं॥ जीवन्गेहे नास्ति बहिरस्तीति चतुर्थं॥ यत्र वादिनात्रैवाभिहितेऽपि अनुभाषणविरोधिव्यापारस्तत्रानुभाषणं॥ यत्र परोक्तं बुध्वापि समयोत्तेनं प्रतिपद्यते तत्राप्रतिभा॥ कार्यव्यासंगमुक्त्वा कथाविच्छेदो विक्षेपः॥ तेन आवश्यकार्थगमनेन दोषः॥ वस्तुतस्तूत्तरस्यैतदपि दूषणसंभावनयाविक्षेपसंभवात्॥ यथा क्षितिः सकर्तृका कार्यत्वात् इत्युक्तेऽङ्कुरेऽभिचारस्तावन्मयोद्भाव्यः॥ तत्र चेदयं पक्षस्समूलकुयात्तदा किमुत्तरमुत्तरार्णवे लिखितमयाचविचारितं किंचिदनुसाव्यत्वेनोद्भाव्यते॥ स्वपक्षदोषमनुद्धृत्य परपक्षदोषप्रसंगोसतानुज्ञा॥ यथा शब्दो नित्यः श्रावणत्वात् ध्वनावनैकान्तिकत्वेन हेत्वाभासोयमित्युक्त्वा शब्दोऽनित्यः इति साधिते ध्वनेरपि पक्षत्वात् तत्रापि हेत्वाभासोयं॥ निग्रहस्थानप्रसक्तौ निग्रहस्थानानुद्भावनं

॥९९॥

॥९९॥

पर्यनुयोज्योपेक्षणं॥ अनियतस्थाने निग्रहस्थाना भियोगो विप्रतिपत्त्यप्रतिपत्तिरप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगश्चेति॥ कथायांस्वीकृतसिद्धान्तप्रत्यवोऽपसिद्धान्तः॥ तथाचसांख्यमतेनाहवदिष्यामि
इति आरभ्याध्यायकथायां अविर्भावस्याविर्भावाभ्युपगमेऽतिदृष्टो धारायां
विर्भावस्यासतोऽसत्तिं यदिभ्युपैतितदाअपसिद्धान्तः॥ हेत्वाभासाश्चोक्ता
॥२० इतिलक्षणप्रकरणं समाप्तं॥ ॥श्रीगुजाननायनमः॥ अथपरिसं
ख्याप्रकरणं॥ ननुप्रमाणलक्षणंयदुक्तंतन्नसंभवति॥ कालत्रयेपिप्रमाणा
भ्रमायावस्तुनश्चाक्यत्वात्॥ तथाचेप्रमाकरणंप्रमाणमितिसूत्रंप्रमाणासिद्धेर्योक्तासाकिंप्रमाणादयेभ्यइतिवापूर्वंभवतिवैकस्मिन्काले भवति
नाद्यः पूर्वंप्रमायाअभावेप्रमाणस्यप्रमाकरणमपिकथंस्यात्॥ न
द्वितीयः प्रमाणासूर्यप्रमासिद्धेप्रमेयसिद्धिर्नस्यात्॥ नतृतीयः प्रमाण

DR BHAU DAJI MEMORIAL

प्रमेययोर्युगपदुत्पत्तौबुद्धीनामर्थनियतत्वायक्रमवत्तित्वंतन्नस्यात्तथातिचे
न्न॥ यदित्रैकाल्यासिद्ध्याप्रमाणाप्रमेयसिद्धिस्तयानोपपद्यतेतदात्वत्कृतत्रि
तिषेध्याप्रमाणं॥ सर्वत्रप्रमाणाभावात्॥ ननुमदुक्तत्रितिषेधःसप्रमाणश्चे
त्तन्मुखेनैवप्रमाणंसिद्धं॥ त्रैकाल्यासिद्धिस्तुयोदोषउक्तःसोपिनास्ति॥
तथाहियथापश्चात्कालिनःशब्दात्पूर्वंसिद्धिस्मरणादेर्यथासिद्धिर्भवति॥ त
थापूर्वंसिद्धप्रमायाएवप्रमाणनोसिद्धिर्भवति॥ ननुइंद्रियादेःप्रमाणव्य
वहारेणप्रमेयव्यवहारोनस्यादितिचेन्न॥ यथातुलादीनांसुवर्
णादिवस्तुयत्तापरिछेदकत्वात्प्रमाणव्यवहारः॥ तुलोत्तरेणतरीयवस्तु
मेयत्तापरिछेदेनप्रमेयव्यवहारः॥ तथेंद्रियादिषुप्रमाणप्रमेयव्यवहारः॥
ननुप्रमाणेप्रमाणमस्तिवानास्ति॥ अस्तिचेत्तत्प्रमाणंसापेक्षतयाअनवस्था
स्यात्॥ नास्तिचेन्निष्प्रमाणंस्यात्॥ यदिअन्यप्रमाणाभावेपिप्रमाणंसिद्धंस्वयं

स्वीक्रियते तदा प्रमेयसिद्धिः स्वीक्रियतां किं प्रमाणसिध्येति चेन्न॥ यथा प्रदीपा
नां घटादि प्रकाशकत्वं॥ तथा प्रमेयस्य प्रकाशकत्वं॥ यथा प्रदीपानां दीपांतरा
पेक्षा नास्ति तथा प्रमाणानां प्रमाणांतरापेक्षा नास्ति॥ इति प्रमाणसामा
न्यपरीक्षा॥ ननु अनुमितिरादौ आत्ममनःसंयोगस्त्वेंद्रियार्थसंयोगजन्यत
यात्र सूत्रे लक्षणस्यातिव्याप्तिः॥ अतः प्रत्यक्षलक्षणे इंद्रियार्थसंनिकर्ष-
॥२१॥ पकारणनिवेशवत् आत्ममनःसंयोगेंद्रियमनःसंयोगादिकारणनिवेशः
कार्यः॥ न चात्ममनःसंयोगस्य कारणत्वमेव नास्तीति वाच्यं॥ आत्ममनः
संयोगाभावे प्रत्यक्षोत्पत्त्यभावात्॥ न च दिग्देशकालाकाशेष्वप्येवं प्रसंगः
स्यादिति वाच्यं॥ यथाकथंचित्प्रोर्वापर्यस्यतत्र सत्त्वात्तेषामन्यथा सिद्धत्वात्
न चात्ममनःसंयोगेप्येवमस्तिति वाच्यं॥ तस्यावश्यकत्वात्॥ तथाहि श्रो
त्रेंद्रियभावकार्यसमवायिकारणं साध्यतिं तच्चेंद्रियं परिशेषाद्यत्रेंद्रि

यन

यं॥ नो चेत्कारणत्वेनमानमिति भावः॥ इत्थंसमवायिकारणस्यात्मनोमनसा
संयोगोऽसमवायिकारणमित्यर्थात्सिद्धं॥ तथेंद्रियमनोयोगद्वारा ज्ञानो
त्पादपद्धतिनियामकत्वान्मनसापि हेतुत्वमावश्यकं अतउक्तप्रसंग
लक्षणं न घटत इति चेन्न॥ प्रत्यक्षलक्षणेहींद्रियार्थसन्निकर्षाभिधानेन
कारणाभिहितसमवायेनमनोयोगाद्यनभिधानेनसुनुमपिलक्षणाभिप्रायेण॥
तथाचेंद्रियार्थसंनिकर्षस्यासाधारणकारणघटितलक्षणस्यलक्ष्यतावच्छे
त्तदु
क्तदोषानापत्तिः॥ तथासुप्तव्यासक्तमनसांघनगर्जितादिसन्निकर्षाज्ज्ञप्ति
ज्ञप्त्यनोसत्तेः॥ एवमिंद्रियार्थसंनिकर्षविशेषणमन्यव्यावर्तकं॥ आत्ममनोयो
गादिकंतुनव्यावर्तकं॥ तज्जन्यत्वस्यानंतरसाधारण्यात्॥ ननुगीतश्रवणादि
कालेचक्षुर्घटसंयोगादेर्विद्यमानेपि चाक्षुषादिज्ञानस्यव्याहतत्वादुक्तदो
षापत्तिरितिचेन्न॥ तत्रशुश्रूषादेः प्रतिबंधकस्यप्रतिबंधकाभावस्यकार्यजन

कला नसहकतेंद्रियार्थसंनिकर्षस्यहेतुत्वा दोषानापत्तिः॥ ननुइंद्रियार्थसंनिक
र्षणपुरोवर्त्तिवृक्षादेरेकदेशग्रहणेनवृक्षादिग्रहणंनभवति॥ तथाचैकदेशग्र
हणात्मकलिंगज्ञानजन्यत्वात्तत्रप्रत्यक्षज्ञानं [redacted] म
नुमितिरेवनप्रत्यक्षमितिचेन्न॥ अवयविसद्भावेदेकदेशग्रहणेनभवति॥ या
वत्तावदुपलभ्यत्वात्याप्यभ्युपगमात्॥ नचावयविनएवाभावेदुक्तदोषानिव
र्त्तिर्नजातितिवाच्यं॥ अवयविनोऽसिद्धौतद्गतगुणकर्मादीनांसर्वेषामेवासिद्धिः
स्यात्॥ एवंचावयव्यभावेएकदेशधारणेनसकलधारणेनस्यात्॥ तथैकदे
शाकर्षणेनसकलाकर्षणंनस्यात्॥ अतोऽवयवेभ्योऽवयवीअतिरिक्तोवाच्यः
तेनदुक्तदोषानुत्तिर्नास्ति॥ अत्राह॥ यद्यवयवेभ्योऽवयव्यतिरिक्तोस्तिचेत्स
किंसमस्तेष्ववयवेषुवर्त्ततेऽउतप्रत्यवयवंयदिसमस्तेषुवर्त्ततततोऽवयव्यनु
पलब्धिःसज्येत॥ समस्तावयवसंनिकर्षस्याशक्यत्वात्॥ नहिबदुतंसम

स्तेष्वाश्रयेषुवर्तमानंव्यस्ताश्रयग्रहणेनगृह्यते॥ अथावयवशःसमस्तेषुव
र्त्ततेतत्रापारंभकावयवव्यतिरेकेणावयविनोवयवाःकलयेत्न॥ येरारंभके
ष्ववयवेषुअवयवशःअवयवीवर्त्तेत॥ कोशावयवव्यतिरिक्तेह्यवयवैरसिः
कोशंव्याप्नोति॥ अनवस्थाचैवंप्रसज्येत॥ तेषुतेष्ववयवेषुवर्त्तयितुमन्ये
षामन्येषामवयवानांकल्पनीयत्वात्॥ अथप्रत्यवयववर्त्ततेतत्रैकत्रस्तो
अन्यत्राव्यापारःस्यात्॥ नहिदेवदत्तःखड्गेनसनिधीयमानःतद्दहरेव
पाटलिपुत्रेपिसन्निधीयते॥ युगपदनेकत्रस्तावनेकत्वप्रसंगात्॥ अवय
विनःअवयवेभ्यःपृथगप्यग्रहेरवयव्यभावः॥ नचतयोस्तादात्म्यसंबंधोस्ति
वाच्यं॥ तत्रादोषदुष्टत्वादिप्रयोगाभावात्॥ अतिचेन्न॥ अवयवशोवृत्तेर्दो
षानास्ति॥ ननुअवयवीएकैकावयवैकात्म्येनएकदेशेनवावर्त्तते॥ नाद्यः वि
वयपरिमाणत्वात्॥ अन्यपितेनावयवेनान्येनवा॥ नाद्यः स्वात्मनस्वरूपेविरो

॥षो०

धात्॥अवयवांतरस्यावयवांतरावृत्तेः॥पूर्वोक्तानवस्थादोषापत्तेश्चेति
चेन्न॥एकस्याशेषताहिकार्त्स्न्ये समुदायिनः किंचित्एकदेशांतरावृत्त्या
वयविनो नकत्स्नाभावात्कार्त्स्न्नैकदेशनतिलक्षतप्रश्नोऽयुक्तः॥अवय
विनोवयवशः स्वरूपेणैववृत्तेः कापिल्पुक्तदोषोनास्ति॥एवंचावयव्य
वयवविभागःपरमाणुपर्यंतेशयः॥तस्यातिसूक्ष्मत्वात्प्रत्यक्षंनभवति ॥२३॥
॥२३॥ तर्हिनूपरिमाणत्वाद्यादीनांप्रत्यक्षंभवति॥नन्यतिदूरस्थैकमनुष्ये
कदृक्षादेरप्रत्यक्षत्वेपिसेनावनादिप्रत्यक्षत्ववदेकपरमाणोरप्रत्यक्ष
त्वेपितत्समूहरूपघटादेःप्रत्यक्षंस्यात्॥प्रत्यक्षेमहत्त्वस्यहेतुत्वात्॥त
दभावादतींद्रियत्वमप्यनु॥ननुतिमिरयुक्तचक्षुषोयुथानेकेशः
प्रत्यक्षः॥किंतुतत्समूहः॥एवमेकपरमाणुरप्रत्यक्षोपितत्समूहस्त

घटादिःप्रत्यक्षःस्यादितिचेन्न॥चक्षुरादीनांमांद्येरूपादिविषय
ग्रहणमांद्यंस्यात्॥एवंचक्षुरादिपाटवेरूपादियहणपाटवंनतुपटुच
क्षुःशब्देस्वाविषयंगृह्णाति॥तथाचक्षुस्वाविषयंपरमाणुंसमूहोत्पन्नंक
थंचक्षुर्ग्रहीयात्॥ननुपरमाणोःकुतोवयवानसंतिदृतिचेत्तस्यापिअ
वयवधारायाअनंतत्वेमेरुसर्षपयोरपिसाम्यप्रसंगः॥अतःकचिद्विश्रा
मोवाच्यः॥यत्रचविश्रामस्तस्यानित्यत्वेऽसमवेतकार्योत्पत्तिप्रसंगात्तस्य
नित्यत्वंसिद्धं॥महत्परिमाणतारतम्यस्यगगनादौविश्रांतत्वमिवाणुपरि
माणतारतम्यस्यापिक्वचिद्विश्रांतत्वमस्तीतितस्यपरमाणुत्वसिद्धिः॥
नचत्रसरेणावेवविश्रामोस्तितिवाच्यं॥त्रसरेणुःसावयवःचाक्षुषत्वय

तद्धटवदिसनुमानेनतद्द्वयवसिद्धौ॥ असरेणोरवयवाःसावयवाःमहद्द्व
यत्वात्॥ घटवदिसनुमानेनतद्द्वयवसिद्धिः॥ नचेदमत्रयोजकं॥ अंपक
रमहत्वंप्रतिअनेकद्रव्यत्वस्यप्रयोजकत्वात्॥ नचैवंक्रमेणतद्द्वयवधारा
पिसिद्धेरितिवाच्यं॥ अनवस्थाभयेनतदसिद्धेः॥ ननुपरमाणोर्निरवय
॥२४॥ वंयदुक्तंतन्नसंभवति तस्यांतर्बहिश्चाकाशसमावेशात्॥ अकाशस्या ॥२४॥
सर्वगतत्वंस्यादितिचेन्न॥ अंतर्बहिःशब्दप्रयोगश्चकार्यद्रव्येनतुअका
र्यपरमाणौतसंभवेनिरवयवत्वात्॥ नचाकाशस्यसर्वगतत्वेसपदेशःस्यादिति
वाच्यं॥ शब्दगतसंयोगस्यसार्वत्रिकत्वात्तत्सर्वगतंभवत्येव॥ अन्यथाविशे
षगुणानामाकाशस्यधर्माः॥ ननुबाह्यपदार्थानांबुध्याभेदोल्लेखात्॥
बुद्ध्यतिरिक्तोबाह्यपदार्थएवनास्ति॥ पंडानांतंतुभिरभेदोल्लेखात्तंतवति

यथा

रिक्तोपटोनास्ति॥ अतस्तत्प्रत्यक्षविचारोऽनुपयुक्तइतिचेन्न॥ लोकेहि
तंतुजःपटइतिप्रतीयतेनतुतंतव एवपटइति॥ एवंपटेनप्रावरणनतंतु
भिरितिदृश्यते॥ एवंचदृष्टांतेसाध्यवैकल्यात्तेनतदुक्तसाध्यसिद्धि
र्नभवति॥ क्वचित्तत्राभेदग्रहणंपराश्रयाद्भवति॥ ननुज्ञानस्वेभ
यवादिसिद्धत्वात्तन्मात्रपदार्थकल्पनेलाघवात्तदतिरिक्तपदार्थाभा
वसिद्धिरितिचेन्न॥ बाह्यपदार्थधियादेःप्रतीतेःप्रमाणाधीनत्वात्॥
प्रामाणिकेर्थेगौरवंनचाथकं॥ अन्यथातन्नैराकारज्ञानमपिनसिध्ये
त्॥ नन्वयंप्रमाणप्रमेयाभिमानःस्वप्नविषयाभिमानवत्मायामयो
वनगरवृक्षमृगतल्लावकास्यात्तइतिचेन्नैषदोषस्यसर्वप्रमाणसिद्धत्वात्
तदुक्तयुक्तेःप्रमाणाभावात्तदुक्तासिद्धिः॥ स्वप्नविषयाभिमानादयोपि

स्मृतिसंकल्पवपूर्वोपलब्धविषयाः संति॥तेनवह्न्यादौतेनाप्यस्मिन्हिर्जाता॥ यथाजागरस्वाप्नविषयत्रयाशोभवति॥तथामायागंधर्वनगरादेरनारोपितवस्तुप्रत्ययानाशोभवति॥ननुशून्यवत्सर्वबाह्यनाशस्यसर्वत्राभ्युपगमात्तेनेतिकथमुक्तमितिचेत्तदानीमपिभाकाशकालदिगात्मनांपृथ्व्यादिपरमाणूनांचसत्तास्तिहिरस्येवान्यथानुनःपृथ्व्यादिसर्गोसिद्धिःस्यात्॥इतिप्रत्यक्षपरीक्षा॥ ॥२५॥

॥श्रीगणेशायनमः॥ननुत्रिविधमनुमानंयदुक्तंतन्नसंभवति॥तत्रत्र॥धूमंपिपीलिकांडसंचारिणंदृष्ट्वानुमानंयदुक्तंतस्याग्नेर्योपघाताधीन॥पिपीलिकांडसंचारेव्यभिचारात्॥द्वितीयंनदीपूरंदृष्ट्वाऽनुमानमुक्तं॥तस्यनदीरोधाधीननदीवेग्यादौव्यभिचारात्॥तृती

यस्यमनुष्यकर्तृकमयूरस्तत्साहश्येव्यभिचारइतिचेन्न॥सर्वत्रव्यभिचारस्याभावात्॥क्वचित्स्थलेशंकायांतर्केणतदुन्नयनात्॥ननुअनुमानस्यत्रिकालविषयत्वमुक्तंतन्नसंभवति॥वर्तमानकालिकविषयाभावात्॥तथाचपतिष्यमानफलेफलंपतिष्यतीतिव्यवहारोजायते॥पतितेतुफलंपतितमितिव्यवहारोजायते॥तेनफलंपततीतिव्यवहाराभावात्वर्तमानाभावइतिचेन्न॥वर्तमानाभावेभूतभविष्ययोरप्यभावःस्यात्॥तयोर्वर्तमानापेक्षत्वात्॥नचतयोःपरस्परापेक्षयैवसिद्धेर्नवर्तमानापेक्षेतिवाच्यं॥अन्योन्याश्रयदोषप्रसंगात्॥वर्तमानाभावेप्रत्यक्षानुपपत्तिःस्यात्॥ततःसर्वस्यायुक्तप्रसंगः॥ननुवर्तमानध्वंसप्रतियोगित्वंभूतत्वमतीतत्वं॥वर्तमानप्रागभावप्रतियोगित्वंभविष्यत्तदावर्तमानत्ववच

टेकथंश्यामआसीदुक्तोभविष्यतीतिचेदुक्तस्यापिघटस्यश्यामरूपादी
नामतीतभविष्यतोपपत्तेर्घटादेरप्यतीतानागतत्वेनपरंपरासंबंधाद्भवति
एवमनुमानस्यत्रैकालयात्कोपिदोषोनास्ति॥इत्युपमानपरीक्षा॥श्रीगणेशा
यनमः॥प्रसिद्धसाधर्म्यादुपमानंयदुक्तंतन्नसंभवति॥तथाचगोसादृश्य
यदुक्तंतत्किं आर्थिकं असंभिकं प्रायिकं रूढिकं वा॥नाद्यः आसंभिक
सादृश्येगौरिवगवयइतिप्रतिपत्तेरनुमानंनप्रवर्तते॥नद्वितीयः॥प्रायिकसाधर्म्ये
णनहिवीप्सेनानाभावात्॥नतृतीयः मेषस्यसर्षपस्याप्येतदभावात्
एवंवैधर्म्योपमानेपिदोषोवेदितव्यइतिचेन्न॥प्रकरणानुसारान्महिष्यादि
वत्प्रसिद्धस्ययत्रसादृश्यंतत्रैवोपमानंसिद्धस्यानुमितिकरणान्नवदुक्तदोषा
पत्तिः॥ननुप्रत्यक्षेणगोसादृश्यंनादृश्यस्यगवयपदवाच्यत्वस्यसि

डाक्टर सम्पूर्णानन्द संस्कृत विश्वविद्यालय MEMORIAL

॥२६॥ गौरिव

द्धेरिदमनुमानमेवनप्रमाणांतरमितिचेन्न॥व्याप्यवत्तयाअप्रत्यक्षेअनुमानस्य
प्रमाणत्वायोजनंनदृश्यते॥व्याप्तिज्ञानजन्यत्वाभावादितिभावः॥इत्युपमानप
रीक्षा॥श्रीगणेशायनमः॥ननुशाब्दंज्ञानमप्रत्यक्षत्वादनुमितिरेवतत्कर
णात्कथंशाब्दंनुमानं॥तथाचशाब्दंअनुमितिश्चनजातिद्वयं॥शाब्दस्यलिं
गविधयाबोधकत्वात्॥शाब्दोहिव्याप्तिग्रहणसापेक्षोबोधयतितेनशाब्दानु
मानमेवेतिचेन्न॥व्याप्तिनिरपेक्षादार्षादिज्ञानाच्छाब्दबोधस्यजातत्वेन
शाब्दबोधोनानुमितिः॥नचशब्दार्थयोःसंबंधाच्छाब्दबोधानुमितिःस्या
दितिवाच्यं॥यदिशब्दस्यार्थेनसहव्याप्तिरूपःसंबंधःस्यात्तदाअनुमितिरेव
शाब्दोच्चारणेनमुखपूरणंस्यात्॥तथादिशब्दोच्चारणेनमुखंशाद्दः स्यात्॥त
थाचारिशब्दोच्चारणेनमुखपाटवंस्यात्॥नचशब्दार्थयोर्मुखपूरणादिनि

नामकभिन्नसंबंधोयाद्यतिवाच्यं॥शाब्दबोधस्यशक्तियहाधीनत्वात्॥गवा
दिशब्दानांवैकार्थकत्वादपिअर्थेनसहशब्दानांसंबंधोनास्ति॥ननुऔशी पद
शःशब्दःप्रमाणमितियदुक्तंतन्नसंभवति॥अन्यतादिदोषात्॥तथाहिपुत्रे
ष्टिकारिर्यांकचिक्कलानुमतिदर्शनादन्यतरूपोदोषः॥तथोदितेजुहोति ॥२७॥
अनुदितेजुहोतिसमयाध्युषितेजुहोति॥१यामेवास्याहुतिमभ्यवहरतिय
उदितेजुहोति॥शबलोस्याहुतिमभ्यवहरतियोऽनुदितेजुहोति॥१यामशब
लोवास्याहुतिमभ्यवहरतीयःसमयाध्युषितेजुहोति॥इत्यादौपूर्वापरविरो
धरूपदोषः॥तथात्रिःप्रथमामन्वाहत्रिरुत्तमामन्वाहयत्रपुनरुक्तरूपदो
षइतिचेन्न॥उक्तदोषाभावात्वेदाप्रामाण्यंनसंभवति॥तत्रपुत्रेष्टिकारिर्या
दोतुफलाभावःकर्मणःअयथाविधिरूपवैगुण्याद्भवति॥तथाकतुरविद्व

॥२७॥

त्तादिवैगुण्याद्भवति॥तथासाधनस्यतुविरादेरप्रोक्षितत्वादिवैगुण्याद्भवति॥
अतोवेदेऽनर्थादिरूपदोषोनास्ति॥नाधिउदितेजुहोतीत्यादौपूर्वापरविरोधरूपदो
षःसंभवति॥अग्न्याधानकालेरितहोमादिकंस्वीकृत्यानुदितहोमादिकरणे
पूर्वोक्तदोषकथनान्नदोषः॥तथापुनरर्थेऽनुवाददोषपत्तेस्तृतीयदोषोनसं
भवति॥पुनरुक्तोनिष्प्रयोजनंहिदोषः॥उक्तस्थलेतुअनुवादस्यप्रयोजन
स्यसंभवात्॥नचानुवादस्यसप्रयोजनत्वंनास्तीतिवाच्यं॥अनुवादेन
विभक्तवाक्यस्यधिरैरपिसप्रयोजनत्वस्वीकारात्॥तथावेदेपिश्रेयो॥
नत्रमंत्रब्राह्मणभेदाद्विधोवेदःब्राह्मणकाश्चेदर्थवादविभागः
कश्चिदनुवादभागोप्यस्ति॥तत्रविधायकवाक्यंविधिः॥यथाअग्नेहोत्रं
जुहुयात्स्वर्गकामइत्यादि॥स्तुतिर्निंदापरकृतिपुराकल्पभेदादर्थवादश्च

तुर्विधः॥ तत्रस्तुतिः साक्षाद्विध्यर्थप्रशंसार्थकं वाक्यं॥ यथासर्वजितावैदेवा सर्वमयजन्तसर्वस्यादौ॥ निंदा अनिष्टबोधनद्वाराविध्यर्थप्रवर्तकंवाक्यं॥ यथाएषवावयज्ञानांयज्ज्योतिष्टोमोयुक्तेनानिष्ट्वाथान्येनयजतेसगर्तेपतति॥ परकृतिः पुरुषविद्वेषनिरतिर्थोविरूक्थन॥ यथादृषद्व्यांवाग्नेरभिचारयंस्यथएषदाज्यंतदुहचरकाध्वर्यवएषदाज्यमेवाग्नेरभिचारयंस्यथएषदाज्यमितिऐतौह्यसमाचरितयथाकीर्तनंपुराकल्पः॥ यथातस्माद्वातेनपुराब्राह्मणाबहिष्पवमानसामस्तोमस्तौषन्यज्ञप्रतिनवमइति॥ अनुवादस्तुविधिविहितस्यानुवचनं॥ तस्मादनुवादपुनरुक्तयोःशब्दाभ्यासस्यात्यादोषोनास्ति॥ यथालोकेगम्यतामितिगत्वागम्यतांगम्यतामितिपुनर्गत्वागम्यतांगम्यतामितिपुनर्गत्वागम्यतामितिपुनर्गत्वागम्यतामितिपुनर्गत्वाग

कारणकत्वलोकप्रसिद्धत्वात्॥ तथा भावे तत्रोक्तिमत्वादिप्रयोगस्य गौणत्वस्य सर्वलोकप्रसिद्धत्वात्तृतीयेनव्यभिचारः॥ अतः शब्दस्य यदनित्यत्वमुक्तं युक्तमितिभावः॥ उच्चारणात्प्रागनुपलब्धेश्च शब्दोऽनित्यः॥ नचावरणादिप्रतिबंधकसत्वाच्छब्दानुपलब्धिरुच्चारणात्प्राग्भवतीतिवाच्यं॥ अवरणादेरप्यनुपलंभेनावरणाद्यभावानिर्णयात्॥ ननुयथाचयाअवरणाद्यनुपलब्ध्याअवरणाद्यभावस्युच्यतेतथाऽवरणानुपलब्धेरप्यनुलंभात्तदभावआवरणोपलब्धिरवस्यात्॥ यदिवाअवरणानुपलंभस्यानुपलब्धावपिनावरणानुपलब्धेरभावस्तदाआवरणस्यानुपलंभादपिनावरण्यानुपपत्तिरितिचेन्न॥ अवरणानुपलब्धेरूपलंभाभावात्कथंचित्तस्यचमनसावस्तुगृहीतत्वेनानुपलब्धेरसिद्धेः॥ ननुशब्दोनित्यः अस्यश्रावणत्वगगनवदितिचेन्न॥ नहिनि

॥२९॥

॥२९॥

सर्वंअस्यश्रोत्रव्यापकंकर्णशष्कुल्यभिव्यंग्यात्॥ नचानेकांतिकोपिहेतुः साधकःस्यादितिवाच्यं॥ परमाणावनित्यत्वप्रसंगात्॥ नचतुरुणाशिष्यायविद्यासंप्रदानाच्छब्दोनित्यइतिवाच्यं॥ अध्यापनात्पूर्वंतस्यानुपलब्धेश्च॥ नचाध्यापनात्पूर्वंशब्दाभावेतदानंकथंघटादितिवाच्यं॥ अध्यापनस्यपूर्वोत्तरपक्षसमत्वात्॥ नचलोकेस्थिरस्याभ्यस्यमानस्यछंदादिदृश्यतेकर्तुंवाकर्मधीतइत्यादावभ्यासदर्शनाच्छब्दस्थिरइतिवाच्यं॥ यथाहिमन्यादीनांस्थस्यव्यक्तिभेदेपिद्विर्जुहोतित्रिर्नयतीतिअभ्यासोदृश्यते॥ एवंशब्दानांभेदेपिअभ्यासःसंभवति॥ नचयदन्यत्तदन्यत्तुस्यस्यसमारेनन्यथाहस्तुतोन्यथाभावएवतस्यवाकथंशब्दभेदःप्रतिपाद्यतइतिवाच्यं॥ अन्यथानन्यत्वयोःपरस्परसापेक्षत्वादन्यत्वस्याभावेऽनन्यत्वमपिनस्यात्॥ ननुशब्दस्यविनाशकारणानुपलब्धेःशब्दोनित्यःस्यादितिचेन्न॥ अनुपलब्धेरप्रत्ययहेमत्वात्॥ ना

यः ॥ अश्रवणकारणस्यप्रयत्नस्यानुपलब्धेः सततश्रवणप्रसंगः स्यात् ॥ नहि तीव्रः अनुपलभ्यमाने विनाशकारणेऽनुपलब्धेरभावात् ॥ नचानुमानादिना विनाशकारणोपलब्धिदर्शनं विनाशदुक्तं सम्यङ्मनस्यादिति वाच्यं ॥ शब्दोपमानेकांस्यादौ पाणिसंयोगाच्छब्दाभावोपलब्धेः ॥ एवंच शब्दस्यूर्ध्वयवीयसंस्कारविशेषो हेतुः ॥ तस्यतीव्रतीव्रतरमंदमंदतरत्वाच्छब्दोपि तादृशस्तत्रोत्तरोत्तरशब्दानां पूर्वपूर्वशब्दनाशकत्वकल्प्यते ॥ शब्दोत्पत्तिस्तु घटादिपाणिसंयोगाज्जायते ॥ नचघटादिपाणिसंयोगस्य शब्दनिवर्तकत्वे घटाद्याश्रयएवशब्दः स्यादितिवाच्यं ॥ शब्दस्याग्निसंयोगासमवायिकारणकत्वाभाववदकारणगुणपूर्वकत्वात् ॥ नचशब्दस्यभूतविशेषगुणत्वेऽग्न्यादिवदग्निसंयोगेनपरावृत्तिः स्यादितिवाच्यं ॥ अग्निसंयोगविनाशाच्छब्दतारनादेरूपपन्नत्वेनस्यशब्दसामुदायशब्दसाहित्याभावात् ॥

॥ २९ ॥ ॥ ३० ॥

ननुशब्दस्यविकारित्वंयदुक्तंतन्नसंगच्छते ॥ तथाहि इकोयणचिइत्यत्रेकारादेः ह्रस्वेयकारादिह्रस्वः स्यात् ॥ तथेकारेदीर्घेयकारादिर्दीर्घः स्यात् ॥ अतः आदेशपक्षः समीचीनः ॥ नचतूलकर्तंतुन्यायेधीजन्यायेधनारीकेलबीजनारिकेलादिप्रकृत्यपेक्षयाविकारस्यस्वल्पनाधिक्यदर्शनान्नादेशपक्षयुक्तइतिवाच्यं ॥ तूलतंत्वादीनामप्रकृतित्वात् ॥ नचयथाद्रव्येषुविकारवैषम्यं तथावर्णेष्वपिस्यादितिमत्वोक्तमित्यत्रकोदोषइतिवाच्यं ॥ विकाराणांचयथोर्णायन्त्रकसूत्रविधानंत्रकृतिभेदभेदइति शब्देषुतुह्रस्वत्वदीर्घत्वादिनाप्रकृतिभेदेपिकार्यभेदाभावात् ॥ शब्दस्यविकारपक्षेदध्यादिवत्पुनरावृत्तिः स्यात् ॥ नचपयसोदध्यादिविकारंप्राप्यस्यापुनरावृत्तावपिशब्दोपुनरापत्तेरुक्तत्वाच्छब्दविकारपक्षोयुक्तइतिवाच्यं ॥ यथापयःपयस्त्वमपहायदधिरूपविकारमापद्यतेतथासूवर्णसूवर्णतामपहाय

कटकारिभावताभावेतदालुटलोपपत्तेः॥ वर्णानांनियतपदेविकारेनसंभ
वति॥अनियतपक्षेपिअचिरस्थायिनेकारस्यधानंतरमिकारनाशादि
कारानुपपत्तेः॥ नचनियतानामकाराद्यानामतींद्रियत्वेपिनियतानांगोवादी
नांऐंद्रियकत्वंभवति॥तथान्यत्रनियतानामविकारत्वेपिशब्दानांनियतप
देपिविकारित्वंस्यात्॥तथाचयथावर्णानामनवस्थायित्वेपिउपलब्धेर्भ
वति॥एवंशब्दानामनियतपदेविकारस्याचिरस्थायित्वेपिउपलब्धिःस्या
दितिवाच्यं॥विकारस्यनित्यत्वासंभवात्॥अनियतपक्षेपिदध्यतिशब्दा
नंतरमत्रेयीतिशब्देनतस्यनाशात्॥नचपयआदिरूपविकारेसति
यथारत्नाशोभवतितथादध्यंतरमत्रेयुच्चार्यमाणेकारनाशदृष्ट
इतिवाच्यं॥पयोदधिवत्रकारवकारयोःप्रकृतिविकारनियमाभावात्
कुमारध्यत्रेयादौरकारयकारयोःप्रकृतिविकारभावः॥कुमार्त्विधि

॥३९॥

॥३९॥

तीयादौयकारेकारयोःप्रकृतिविकारभावः॥नचेकारयकारयोःप्रकृतिवि
कारभावस्यवानियमितत्वान्नियमोनयुक्तइतिवाच्यं॥अनियमोहिने
यमाभावस्तस्मिन्सतिनियमासंभवात्सतिचेन्न॥गुणांतरापत्युपमर्दहा
सरूपध्वंशश्लेषेभ्योवर्णविकारोपपत्तेः॥गुणांतरापत्तिरुदात्तेऽनुदा
त्तेविधाने॥उपमर्दोऽस्तेभूरियादौ॥ह्रासःदीर्घस्यह्रस्वविधाने॥
वृद्धिर्ह्रस्वस्यदीर्घविधाने॥लेशोऽत्वंअस्तेरकारलोपः॥श्लेषोभा
गनः॥एवंचशब्दोविकारइतिसिद्धं॥तेशब्दाविभक्त्यंताःसंतःपदसंज्ञा
काभवंति॥व्यक्त्याकृतिजात्यस्तुपदार्थाः॥तत्रजात्याश्रयाव्यक्तिः॥आकृ
तिर्जातिर्लिंगं॥समानाकारबुद्धिजननयोग्यधर्मविशेषोनियतैकसं
वेताजातिः॥ननुव्यक्तिरेवपदार्थःजात्याख्योवस्तुतोनेतत्रमानाभावात्

तथाहि गौः गच्छति गवां समूहः गां दत्ते गां गृह्णाति दक्षिणावः गौर्वर्धते कक्षा गौः कपिला गौः गौर्हितं गौः प्रस्तारः क्रियायोगस्य व्यक्तावेव संभवात् इति चेत् । श्रेयस्तु व्यक्तिनात्रस्य शक्यत्वेगवादिपदाद्यस्ति चिव्यक्तेरपि प्रतीतिः स्यात् अतः गोत्वविशिष्टा व्यक्तिर्वाच्या तथाचनाऽदीतविशेषणन्यायात् जातावेव शक्तिरस्तु ॥ ननुजातौशक्तिरयं व्यक्तिबोधः कथंस्यात् इति चेत् । उच्यते ॥ यथाषष्ठिंभोजयेत्यत्रषष्ठिधरब्राह्मणेसहचारात्षष्ठिशब्दप्रयोगः ॥ एवंमंचाःक्रोशंतीत्यत्रतदवस्थपुरुषेस्थानांचशब्दप्रयोगः तथाकटंकरोतीत्यत्रकटार्थकरणेतादर्थ्यात्कटशब्दप्रयोगः ॥ एवंकुशमनुशासनाद्राज्ञियमशब्दप्रयोगः ॥ यथासक्तुषुप्रसाणीआढकशब्दप्रयोगः ॥ यथातुलाचंदनमित्यत्रचंदनेधारणात्तुलाशब्दप्रयोगः ॥ यथागंगायांघोषइत्यत्रतीरेसामीप्याद्गंगाशब्दप्रयोगः ॥ यथाकुछाःशाटकइत्यत्र

योगात्कुछशब्दप्रयोगः ॥ यथाऽन्नंप्राणाइत्यत्रप्राणसाधनेऽन्नेप्राणशब्दप्रयोगः यथाराजेवास्यकुलमित्यत्राधिपत्याद्राज्ञिकुलशब्दप्रयोगः ॥ तथाव्यक्तौगोत्वविशेषणत्वाद्गोशब्दप्रयोगःस्यात्रकाश्चेदाह ॥ काऽत्राकृतिरेवपदार्थः यथाप्राणिव्यक्तस्थासिद्धेःआकृतेरेवोपस्थितत्वात् ॥ एवंजातेराकृत्यपस्थितत्वात्तत्र जातिःपदार्थस्यात्राऽऽह ॥ जातिरेवपदार्थः ॥ यतोव्यक्त्याकृतिषुकोपिरूढकेप्रेरणादीनांसंस्काराणामत्रसुगात् इतिचेत्तर्हिजातिशब्दबोध्यस्याकृतिव्यक्तिविषयकत्वनियमइजातिवत्तयोरपिपदार्थत्वंआवश्यकं ॥ एवंचजातिव्यक्त्याकृतयःपदार्थाइतिसिद्धं ॥ इतिशब्दपरीक्षा ॥ श्रीगुरुजानते ॥ ननुप्रमाणचतुष्कंयदुक्तंन्नसंभवति ॥ प्रमाणांतराणामितिचाधायोक्तेसंभवाभा

यानामपि सत्वात् ॥तत्रैति खंपरंप्रत्यागतं वाक्यं ॥अर्थापत्तिः अर्थकल्पना ॥
यथापीनोदेवदत्तोदिवानभुंक्तेरात्रौभोजनंकल्प्यते ॥संभवस्तु
भूयःसहचाराधीनंज्ञानं ॥यथागवयेविषाणसंभवति ॥सहत्वेसतिसंभवति
भावोभिन्नस्यभावइतिचेन्न ॥शब्देऐतिह्यप्रमाणस्यांतर्भावात् ॥अनुमाने
॥३३ अर्थापत्तिसंभवाभावानामंतर्भावोपिदोषोनास्ति ॥ननुअसतिमेघे ॥३३॥
वृष्टिर्नस्यादित्यतेनसतिमेघेवृष्टिर्भवतीत्यर्थापत्तिविषयस्तत्रनप्रमाण्यं
सतिमेघेवृष्ट्यभावात् ॥अतस्तदंतर्भावोचेत्स्यादिति चेन्न ॥तत्रनमेघ
वृष्टिज्ञानमात्रमितिकिंतुवृष्ट्यानेघज्ञानंअतउक्तिश्चिंतयुक्ता ॥नचाभाव
प्रामाण्यंनास्तीतिवाच्यं ॥तस्यप्रतियोगिज्ञानाधीनज्ञानत्वात्तदुक्तदोषा

अतः

नुपपत्तेः ॥नचप्रतियोगिनिसतिवाऽसतिअभावोवक्तुंशक्यतइतिवाच्यं ॥
अन्यत्रप्रतियोगिनःसत्वेअभावोपपत्तेः ॥ननुतत्तल्लक्षणेतत्तल्लक्ष्यसिद्धि
र्भवतिअन्यलक्षणेःकथंअभावसिद्धिःस्यादितिवाच्यं ॥प्रतियोगिज्ञानादेवा
भावस्वरूपनिरूपणसंभवात्अभावलक्षणापेक्षाभावात् ॥इतिप्रमाणपरीक्षा
॥श्रीगणेशायनमः ॥अथद्वादशविधंप्रमेयंपरीक्ष्यते ॥सर्वत्रपरीक्षांआदौल
क्षणेसंशयस्ततःपूर्वोत्तरपक्षौ ॥सर्वत्रपूर्वोत्तरपक्षयुक्तिहृद्यंसंशयबीजंहृद्यं
॥अत्रादौधामानुपरीक्ष्यते ॥नचोपन्यासोनिर्जगद्धेतुत्वेकिंप्रमाणमिति चेत् ॥ई
श्वरादिःसकर्तृकःकार्यत्वात्घटवदितिअनुमानंतत्रप्रमाणं ॥नचतर्हिजीवानांतत्क
र्तृत्वमस्तिति वाच्यं ॥जीवानांशरीरादानागोचरज्ञानाद्यभावेकीदृक्कृतिमत्त्वाभावात् ॥

नच दृष्टद्वाराजीवा नांतकर्तृत्वमाक्षिपति वाच्यं ॥ पुरुषादृष्टस्यापीश्वरकारितत्वात् ॥
अत्रनिमित्तकारणमीश्वर ॥ उपादानकारणंपृथ्व्यादिपरमाणवः ॥ ननुपयसो
ऽभावाद्धुसुक्तेर्दध्यादृष्टद्वारा जनाशादंकुरोत्पत्तेर्दध्यादृष्टभावस्यैवकारणत्वं
किमीश्वरेणेतिचेन्न ॥ तदृष्टक्षतिप्रसंगात् ॥ नच जानेध्यमाणपुत्रमाभिनंदतो
॥३४॥ पुत्रपुत्रागमभावस्यहर्षकारणत्वदर्शनात् ॥ भिन्नकुंभमनुशोचतीयत्रकुंभध्वं
साभावस्यशोककारणत्वदर्शनात् इतिवाच्यं ॥ उक्तस्थलेतद्भातियोगिनोहर्षशो ॥३४॥
कहेतुत्वात् ॥ अभावस्यकारणत्वेपूर्वोक्तदोषप्रसंगः ॥ प्रतिबंधकाभावस्यकार
णत्वंयुक्तमेवेष्टत्वात् ॥ ननुघटादिकंसकारणकंभावत्वात् कंटकतैक्ष्ण्यादिवत्
इतिचेदेकदेशाहेतुः ॥ सयाऽनिमित्तानिमित्तवाभ्युपगमाकृतकमनियतापरादौस्यात्
इत्यत्रान्यआह ॥ निमित्तोनिमित्तयाभेदाद्वाक्तानुपपत्तेः ॥ ननुजगत्कारणंनित्यं

परमाणूनांनित्यत्वंयदुक्तंतदसंगतं ॥ उत्पत्तिविनाशधर्मकाःसर्वेभावानित्यं
इतिचेन्न ॥ यदुक्तंतार्क्ष्यभाष्यात् ॥ परमाण्वाकाशकालादिव्यतिरिक्तरथकृदु
क्तंहेतोरभ्युपगमात् ॥ केवलोत्पत्तिधर्मकमपिनविनाशसाधकं ॥ ध्वंसेव्यभिचा
रात् ॥ ननुघटध्वंसोऽपिनित्यः ॥ नच ध्वंसस्यनाशप्रतियोग्युत्पत्तिमत्त्वापत्तेः
स्यादितिवाच्यं ॥ अग्निरिंधननाशानंतरंनाशदर्शनात्इतिचेन्न ॥ धर्मिग्राहकमा
नेनलाघवसहकृतेनध्वंसस्यनित्यत्वाभ्युपगमात् ॥ नचसर्वेषांसमवायिकारणा
नांपरमाण्वनांनित्यत्वेसर्वेषांनित्यत्वप्रसंगःस्यादितिवाच्यं ॥ घटादीनामुत्पत्ति
नाशकारणानांकपालसंयोगमुद्गरपातादीनामुपलब्धेः ॥ नचपरमाणुनाशक
क्षणंतस्यघटादौस्यात्तंत्रोत्पत्तिविनाशप्रत्ययोभ्रमएवेतिवाच्यं ॥ सर्वलोकप्र

दुस्थत्वमतेप्रमाश्रमव्यवस्थानुपपत्तेः॥ तथाघटादौजलादिनाभाप्रतीतापरम्
णुनिरन्वयप्रतिषेधोपि नोवाच्यः॥ ननुसर्वेषांलक्षणरथकुटादेकस्मिन्नपिघ
टेरथकुटंस्यादितीचेन्न॥ घटादौरूपरसादिभिस्तदवयवेभ्यैकभावनिष्प
त्तेः॥ घटपटादीनांलक्षणव्यवस्थानादेकत्वात्॥ ननुसर्वत्रघटःपटोनेतिअ
भावव्यवहारात्सर्वंअभावएवास्तुइतिचेन्न॥ एकध्यादीनांतुतत्रतत्रधर्मा दी
नांसत्वेनास्तित्वसंभवात्॥ सापेक्षत्वतुतद्व्यासज्यवृत्तित्वात्॥ ननुवैशेषिकानांमते
सद्रूपएकएवपदार्थः॥ केषांचिन्मतेनित्यानित्यभेदेनपदार्थोद्विविधः॥ केषांचि
न्मतेद्रव्यगुणकर्मभेदेनत्रिविधःपदार्थः॥ केषांचिन्मतेप्रमात्प्रमाणप्रमि
तिप्रमेयभेदेनचतुर्विधःपदार्थः॥ सौगतमतेपंचस्कंधाः॥ कणादमतेद्रव्यगुणक

र्मसामान्यसमवायाभावाख्यसप्तपदार्थाः॥ तत्रैवभाष्याभिप्रायेणसप्तमोऽभावएवंतत्त्व
येतेतेपदार्थाःसप्रमाणाइतिचेत्न॥ अयंसंख्येकांतवादःसप्रमाणकोऽप्रमाणको वा
नाद्यःसाधनस्यसाध्यातिरिक्तस्यापेक्षितत्वात्॥ सर्वेषांसप्रमाणकत्वेपदार्थसंख्या
नियमानुपपत्तेः॥ नांत्यःप्रमाणाभावात्॥ नचनसंख्येकांतसिद्धिःप्रमाणस्यावयव
भावात्॥ उक्तस्यैकदेशावयवावयविनोश्चभेदाभावादितिवाच्यं॥ सर्वस्य
तदन्यहेतोरभावात्॥ एवंचजगतःसमवायिकारणंपरमाणवः॥ निमित्तकारण
मीश्वरइतिसिद्धं॥ परमाणवोभिन्नाजीवाअनंताः॥ तेपियोहटमद्राक्षं
सोयंस्पर्शाम्यनुभवादिंद्रियादिभ्योभिन्नाः॥ नचचक्षुरुन्मीलादीनांरूपस्य
र्शादिनियतविषयत्वान्नतत्रान्योक्तिरितिवाच्यं॥ प्रत्यक्षेन्द्रियाणांकारणत्वेपिअनु

मिसदौकारणत्वाभावात्॥ चक्षुरादिनाशेविषयस्मरणात्॥ अहंचक्षुरित्याद्य
प्रतीतेश्च॥ ननुइंद्रियादीनामास्रवंनास्तुतथापिरूपोहंस्थूलोहंमित्यादिप्र
तीतेभ्यश्शरीरमेवास्तुइतिचेन्न॥ उत्तरकालिकभोग्यदुःखाभावप्रसंगात्
ननुपातकाभावसात्कशरीरस्यनाशेपिप्रसक्तः॥ यतोआत्मनोनित्यान्नि
र्विकारत्वेनिर्विकारश्चोक्तधर्मानाश्रयत्वमितिचेन्न॥ केवलस्यकथञ्चिद् ॥३६॥
कशरीरस्यैवनाशोभवतिनवात्मनस्तस्यकर्तृत्वाद्यभिमानान्नपापनाशः
ननुवामनचक्षुषादृष्टस्यदक्षिणेनप्रयोगाच्चक्षुर्हृतंसिहिरितिचेन्न॥न
ध्यस्थनासारूपसेहृतंगगस्यवव्यवहितत्वाद्धेतभ्रमः॥ ननुएकस्यचक्षुषो
वक्षुषनाशोद्वितीयस्याविनाशात्तद्दोषयुक्तइतिवाच्यं॥ अवयवनाशेपिअ

वयव्युपलब्धेरितिचेन्न॥ दृश्यावयवोच्छेदेखंडदृश्योपलब्धेः॥ नन्वक्षिंद्रियभेदाचं
तावित्रारूढेंद्रियेभ्यआत्मभेदविचारस्तुप्रकृतेतत्सिद्धिचारोनक्तव्यइतिचेन्नि
रिवित्वादीअमूलद्रव्येदृष्टेतद्दृसस्मरणात्इंद्रियादिभ्योभिन्नआत्मेतिसिध्य
ति॥ तथास्मृतिदर्शनादिभिःसामानाधिकरण्यमानाभावात्तत्सिद्धिः॥ ननु
स्मृतेर्विषयतयासामानाधिकरण्यमस्तितिचेत्यमियाहकमानेनस्मृतेरासंगु
क्तसंभवात्॥ अहंस्मरामीत्यनुभवाच्चेत्॥ ननुस्मर्तव्यविषयाणांस्मृतिस
मवायित्वमस्तुइतिचेत्तेषामनेयत्वाच्चघटाद्व्यतिरिक्तात्मसिद्धिः॥ नचात्म
प्रतिपत्तिहेतूनामनसिसंभवान्मनएवात्मास्त्वितिवाच्यं॥ मनसआत्मत्वेव्या
संगाद्युपपादनायकरणांतरप्रसंगात्॥ एवंचात्मामनःप्रभृतीन्द्रियादिभ्योभि
न्नइतिसिद्धं॥ पूर्वाभ्यस्तस्मृत्यनुबंधाज्जातस्यजातस्यबालस्यहर्षभयशो

कसंप्रतिपत्तिदर्शनात् आसुखादिः॥ ननु बालस्य हर्षादयोऽपि सुखविकाशा
नुमेयाः॥ न च तत्संभवोऽयमादीनां प्रबोधादिवत्॥ अदृष्टविशेषाधीनात्क्रिय
वशादेवतदुपपत्तेरिति चेन्न॥ पांचभौतिकयमादिविकाराणां सुप्ताशीतवर्ष
कालनिमित्तत्वात्॥ अतोमनुष्यादीनां हर्षादिनिमित्तसुखविकासादयश्चेति न
तुल्यश्चयर्थः॥ पूर्वपूर्वजन्मकृताभ्यासाऽऽतस्यस्तन्याभिलाषाभ्यास
नियमइत्यर्थः॥ ननु भायसोऽक्लांताभिसुखगमनवद्बालस्य स्तन्याद्यभि
वृत्तिरास्थितिचेन्न॥ सरागस्यैवजन्मकथनात्॥ वीतरागजन्मादर्शनाच्च॥
ननु यथाघटादीनांरूपादिविशिष्टानामुत्पत्तिर्भवतितथारागविशिष्टस्य वा
त्मस्योत्पत्तिर्भवत्विति चेन्न॥ रागादीनामिष्टसाधनताज्ञानाधीनत्वात्॥ अतः

अनादिनिधनआत्मेतिसिद्धं॥ इत्यपरीक्षा॥ श्रीगजानन॥ ननु गंधरसरूपस्पर्श
शब्दाश्रयत्वाच्चातुर्भौतिकंशरीरमास्थितिचेन्न॥ सूर्यंतेचक्षुस्त्वंमीत्यादिमंत्रा
तपृथिव्यांतेशरीरमित्यभिधानेनशरीरस्यापार्थिवत्वनिश्चयात्॥ ननुपूर्वसृष्ट
दृष्टसहकारिभावाच्छरीरस्योत्पत्तिर्युक्तासान॥ यथादृष्टानिरपेक्षपरमाणु
भ्योन्नदादेरारंभस्तथादृष्टनिरपेक्षपरमाणुभ्यःशरीरारंभोवाच्यइतिचे
न्नदादेरप्यदृष्टसापेक्षपरमाणुभ्यएवोत्पत्तेरभ्युपगमात्॥ मातापित्रो
र्देवताराधनादिरूपकर्मणःपुत्रादिनिमित्तत्वात्॥ तथापितामहपिंडभोज
नादेरदृष्टद्वारापुत्रजनकत्वात्शरीरस्यन्नदादिसाम्याभावाच्च॥ तथादृष्ट
योःसंप्रयोगेगर्भधारणस्यानियमात्॥ शरीरस्यसर्वांगसुंदरत्वेपिस्त्रीपु

स्य

संयोगविशेषौ कर्मणः सापेक्षयात्॥ शरीरस्यादृष्टसापेक्षत्वेनानुमान
नरकरिपक्ष्यादेः शरीरसंबंधस्य व्यवस्था भवति॥ अदृष्टं विना शरीरसंबंधे
मुक्तात्मन्यपि शरीरसंबंधः स्यात्॥ न चादृष्टमनोगुणोस्तीति वाच्यं॥ अदृष्टस्य
मनोगुणत्वे संयोगानुत्पत्तेर्मरणस्यानुपपत्या शरीरनित्यत्वप्रसंगः॥ ननु यथा ॥२८॥
अणुश्यामतानित्यापि निवर्तते तथा नित्यस्यापि शरीरस्य निवृत्तिः स्यात्॥ ॥२८॥
इति चेन्न॥ अणुश्यामतानित्यत्वस्यास्वीकारात् तथा च दृष्टांतासिद्धिः॥ इति शरीरपरीक्षा॥ श्रीगजानन॥ ननु गोलके सति विषयोपलंभाद्गोलकमेव चक्षुस्यादिति चेन्न॥ गोलकातिरिक्तविषयोपलंभात्॥ महदणुत्वेनानुग्रहणाच्च गोलकातिरिक्तं तत्॥ महदणुत्वेनानुग्रहणं तु इंद्रियार्थसंनिकर्षः स्यादिति॥ न च गोलका

तिरिक्तचक्षुषो प्रयक्षतोऽनुपलब्धयादिंद्रियार्थसंनिकर्षो नेहेतुरिति वाच्यं
रूपोपलब्धेः सकारणकत्वादिनाऽनुमेयस्य चक्षुषः प्रसक्षतोऽनुपलब्धिर्ना
भावहेतुः॥ अयंभावः प्रसक्षस्य द्रव्यमात्रेऽपलब्धेर्नियमः यतः प्रसक्षस्य
द्रव्यमहत्त्वरूपोद्भूतत्वाधीनत्वात्॥ चक्षुषि तदभावात्तत्प्रसक्षं नास्ति॥ ननु च
क्षुरादावुद्भूतत्वं कुतो नास्तीति चेदिंद्रियाणामुपभोगसाधनत्वमदृष्टविशेषा
धीनमस्ति॥ ननु मध्यान्हकाले महतोपि उल्काप्रकाशस्य सौरप्रकाशेनाभिभवो
भवति तथा चक्षुषस्तेजोमहत्त्वेपि बाह्यालोकेनाभिभवः कल्प्यतीति चेन्न॥ रात्रा
वप्यनुपलब्धेः॥ तथा चानुद्भूतरूपवच्चक्षुषोनुपलब्धिरिति भावः॥ यतो वा
ह्यप्रकाशापेक्षत्वात्॥ तस्योद्भूतत्वेऽनुष्णाशीतस्पर्शाभिव्यक्तद्रव्यकल्पनेगौरवात्

तथाचनकंचराणांरश्मेरंशादीनांगोलकेरश्मिदर्शनात्॥तद्दृष्टांतेनपरेषामपि
रश्म्यनुमानंयुक्तं॥ननुकाचाभ्रपटलस्फटिकांतरितापुलाध्यर्थतोभवतिअ-
प्राप्यकारित्वंस्यादितिचेन्न॥कुड्यांतरितविषयेचक्षुषोऽप्राप्यत्वात्॥काचा-
तरितविषयेतुकाचादिनास्वच्छद्रव्यणप्रतिघातात्तेचक्षुषःसंनिकर्षोवर्तते॥य
थाअग्निरश्मीनांस्फटिकांतरितेपिघटादौसंनिकर्षादृश्यतेतद्वत्॥नचकुड्यादि
नस्फटिकादयपिचक्षुःसंनिकर्षप्रतिबंधकंभवेदितिवाच्यं॥दृष्टानुसारेणफलक ॥३९॥
ल्पनात्॥तथाचकुड्यादीनांकाचादीनांचप्रतिबंधकत्वंप्रतिबंधकत्वंचस्वाभा
व्यादवश्यंवाच्यं॥यतोदृष्टानुमितामेवंभवतेतिनियोगस्तथाचैवंप्राप्तभवतीतिनिषेध्य
नोपपद्यते॥स्पर्शेंद्रियस्यतिक्ता॥ननुबहूनांबाहुल्येपिबहुत्वंविनैकस्यदर्शनात्इं
द्रियाणांबाहुल्येपिबहुत्वंविनैवैकमेवेंद्रियंकल्प्यतामितिचेन्न॥यतस्थानान्यत्वेघटा

दीनांनानात्वदर्शनात्॥ननुस्पर्शेंद्रियेणचःसंयुक्तेवैकमिंद्रियमस्तुइतिचेन्न॥यदि
चक्षुरूपमेकंतींद्रियंस्यात्तर्हियुगपदुपरंधाद्युपलब्धिर्नस्यात्॥अतइंद्रियग्राह्यगु
रूपादीनांपंचत्वात्तत्पंचैवेंद्रियाणीतिसिद्धांतः॥नचसुरभ्यसुरभीनीलपीतत्वादी
नामनेकत्वादेकेनसंयुज्यतइतिवाच्यं॥उक्तसुरभ्यादिनापंचगुणेभ्यतिरिक्तात्
नचतर्हिविषयव्यतिरिक्तोघटादीनांविषयरूपएकोगुणःस्यादितिवाच्यं॥
चक्षुरादीनांचक्षुषादिभिःपंचत्वात्तथातेषांविषयाणांरूपादीनांपंचत्वात्॥तथा
गोलकावस्थानानांपंचत्वात्तथापध्यक्षाणांपंचत्वात्॥तथाचेंद्रियाणांतत्तद्विषयग्र
हणानुपपत्तेरपध्यादिविशेषगुणगंधादिपंचविषयगुणग्राहकत्वात्कथंसचसंख्यासिद्धि
रितिइंद्रियपरीक्षा॥इंद्रियग्राह्याशब्दस्पर्शरूपरसगंधत्वाविशेषगुणाःक्रमे
णाकाशादिगुणैकादिक्रमेणसंख्याः॥ननुभाकाशादिषुयदिएकादिगुणास्तर्हिपार्थि

चेन्घ्राणेंद्रियेण सर्वगुणग्रहणं स्यादिति चेन्न॥ पृथ्व्यादौ गंधादिप्राधान्यात्॥
ननुतर्हि पृथ्व्यादौ रसादियुतेन कथमिति चेत्कारणसंसर्गाज्ज्ञेयं॥ ननुएवं
तर्हि पृथ्व्यादौ गंधप्राधान्यात्किमिंद्रियंकुतनेंद्रियमिति चेत्पृथ्व्याधारत्वात्घ्रा
णादींद्रियव्यवस्थितेः॥ इंद्रियगंधादिविशेषाणांघ्राणादीनांगंधादिसाहाय्यका
रकारणत्वात्॥

॥४०॥ श्रीगजानन॥ ननुबुद्धिराकाशसाधर्म्यान्निस्पर्शत्वान्नित्येतिचेन्न॥ निस्पर्श ॥४०॥
त्वस्यानित्यैकगुणव्यभिचारात्॥ ननुयाहंघटमद्राक्षंसाहंघटंस्पृशामीतिप्र
त्यभिज्ञायावत्तिमतींबुद्धिंविषयीकरोतीयतोऽहेःप्रतिसंधात्वंनित्याबुद्धिरितिचे
न्नाहंजानामीत्यादिनाभासनएवप्रतिसंधात्वप्रत्ययात्॥ बुद्धेरवत्तिमतोरभेद

वत्तिमतोऽवास्थित्यावत्तेरप्यवास्थितिःस्यात्तथाचयुगपद्ग्रहणंस्यात्॥ वत्तेरनव
स्थायित्वेवत्तिमत्यापिनाशात्॥ नचवत्तेक्षानयोगपद्यंस्यादितिवाच्यंत
तइंद्रियैःसहमनसःक्रमेणसंबंधेनस्यानक्रमिकत्वात्॥ इंद्रियांतरेणमनसः
संबंधोऽनेंद्रियजज्ञानाभावात्॥ नचमनसोऽपिएवंस्यानक्रमिकत्वमस्तीतिवाच्यं
तन्मतेमनसोविभुत्वेनक्रमेणसंबंधाभावात्॥ ननुयथाजपाकुसुमसंनिधाना
दकस्यापिस्फटिकस्यतद्रूपाभासस्तथावत्तिमदाभासापिवत्तिस्तद्विषयसं
निकर्षवशात्तानेवप्रतिभासतइतिचेन्न॥ भ्रमत्वेसाधकाभावात्॥ ननुप्रतिक्षणं
शरीरेषुपचयापचयदर्शनाद्भावानांक्षणिकत्वात्स्फटिकेपिअत्यंतविलक्षणस्फ
टिकसंतानेतेपिभ्रमतोभावइतिचेन्न॥ पदार्थानांप्रतिक्षणंविनाशसामग्रिचे

शिष्यनिर्मलमानात्॥ तथाप्रतिक्षणं पूर्वोत्तरस्फटिकविनाशेऽपि कारणानुपल
ब्धेश्च॥ ननु क्षीरविनाशाद्ध्रुवभाविकारणानुपलब्धेर्यत्कारणानुपलब्धिस्तिति
चेन्न॥ क्षीरदधिविनाशोत्तरयोः प्रयत्नेन तत्कारणकल्पनात्॥ पूर्वापरस्फटिक
विनाशोत्तरप्रयत्नस्य कारणमानाभावात्॥ नच नद्ध्रुवभाविकारणानुपलब्धेः किंतु अपूर्व
रसादिप्रादुर्भावहेतोरस्यैव परिणामरतिवाच्यं॥ व्याद्व्यासक्तिदर्शनेन पूर्व ॥४१ ॥४१
द्रव्यनिवृत्तेरनुमानात्॥ नन्वस्तु क्षीरदधिविनाशोत्तरयुपलब्धेस्तथापि न तत्का
रणोपलब्धिरितिचेन्न॥ यदि सकारणकयोपलब्धेर्व्यभिचारात्॥ नच भयाका
शकाशसंयोगाधीनशब्दस्याकाशनिष्ठस्येन्द्रियार्थसंनिकर्षाधीनबुद्धेः
रिंद्रियनिष्ठत्वं वाऽर्थनिष्ठत्वमनुमितिवाच्यं॥ इंद्रियार्थयोरभावेपि स्मरणरूपबु

द्धेरनुभवानात्॥ युगपज्ज्ञेयानुपलब्धेश्च नसिद्धस्य मनसोऽणुत्वेन बुद्धेस्तद्गुणत्वेन
तदुत्तरसुखाद्यसत्कथाभावात्॥ नच बुद्धेरात्मगुणत्वेप्यात्मनः सर्वेंद्रियसंयोगा
त्तज्ज्ञानयौगपद्यस्यादितिवाच्यं॥ युगपन्नानेंद्रियैः सह मनः संनिकर्षाभावे
नज्ञानायौगपद्यात्॥ नच बुद्धेरुत्पत्तिविनाशकारणानुपलब्धेर्नित्यत्वा
दगुणत्वाभावइतिवाच्यं॥ आत्ममनोयोगादेरुत्पत्तिकारणस्य बुद्धेरुत्तरबुद्धेः शब्दव
न्नाशकारणस्य बुद्ध्यनित्यत्वेनासगुणत्वात्॥ ननु बुद्धेरगुणत्वे संस्कारास
मनोयोगयोः सत्स्मृतीनां यौगपद्यं स्यादितिचेन्न॥ प्राणिधानादीनामेव हेतूनां क्रमात्स्मृतिक्रमोपपत्तेः॥ तेच प्राणिधानादयस्त्रयः॥ प्राणिधानं १ निबंधः २ अभ्या
सः ३ लिंगं ४ लक्षणं ५ साद्दश्यं ६ स्वीकारः ७ आम्नायः श्रुतौ ८ संबंधः ९ अनंतर्य

वियोगः ११ एककार्य १२ अतिशयः १३ प्राप्तिः १४ व्यवधानं १५ सुखदुःखे १६ इच्छा
द्वेषौ १८ भयं १९ आधिः २० क्रिया २१ रागः २२ धर्मः २३ इति ॥ तत्र प्राणिधानमेकं
धोपनिबंधनं यथान्न प्राणेनप्रमेयस्य स्मरणं ॥ अभ्यासः संस्कारवान् लयं ॥ लिं
गं व्याप्यं धूमादि व्याप्यस्याग्नेः स्मारकं ॥ लक्षणं कपिध्वजादि अर्जुनादेः स्मा
रकं ॥ सादृश्यं गवयेगोः स्मारकं ॥ स्वीकारः स्वस्यानिभावस्तदेकतरदर्शने
नान्यस्य स्मरणभवति ॥ आश्रयाश्रितौ राजादितत्सेविजनौ ॥ संबंधोगुरुशिष्य
भार्यादिः ॥ एककार्यं अंतेवासि प्रभृतयः परस्परस्मारकाः ॥ विरोधः अधर्मो
धर्मस्मारकः ॥ अतिशयः अन्यार्थदेः स्मारकः ॥ प्राप्तिर्धनादेर्दाता स्मारयति ॥
व्यवधानं मानरणं कोशादिः रत्नादेः स्मारकं ॥ सुखदुःखयोरन्यतरेण परस्परा

MEMORIAL

भ्यां तत्प्रयोजकस्य वा स्मरणं ॥ इच्छाद्वेषौ यद्विषयतया गृहीतौ तत्स्मारकौ ॥ भयं तरणा
देर्भूयो हेतोर्वा स्मारकं ॥ अधिर्मुहुतः शास्त्रादेः ॥ क्रिया याद्यादेः ॥ रागः पुत्रादेः ॥ धर्मो
धर्मो जन्मांतरानुभूतसुखदुःखसाधनयोरिति ॥ ननु यदवच्छेनासनिस्संस्कारस्तद
वच्छेदेन मनःसंनिकर्षस्मृत्युदयहेतुरिति चेन्न ॥ शरीरातिरिक्तावच्छेदेनासतो योग
स्य ज्ञानाहेतुत्वात् ॥ न च मनसो बहिर्निर्गतं विनास्मरणं नस्यादिति वाच्यं ॥ मनसो बहि
र्भावेशरीरावच्छिन्नमनोयोगाभावेन प्रयत्नाभावेशरीरधारणाभावात् ॥ यदि बहिः
प्रदेशविशेषमनःसंयोगविशेषोभवति चेत्तर्किं स्मर्यमाणप्रेरणेनयदृच्छया वास्मृ
तत्या वा ॥ नाद्यः तस्मिन्स्मरणीयज्ञानपूर्वकतया ॥ नाद्यस्तस्य स्मरणीयज्ञानपूर्व
कत्वे प्रागवस्थायाप्तेः ॥ नाद्वितीयः आकस्मिकत्वस्यनिषेधात् ॥ नतृतीयः मनसो
ज्ञातृत्वानभ्युपगमात्तीति चेन्न ॥ नस्यादिधुर्याससक्तमनसः कण्टकादिनापादव्यधने

नमनः संयोगीअथाजायतेतथाऽदृष्टविशेषाधीनकर्मनाशानदर्शीतिभावः॥ स्मृति
स्तासनःस्थानवत्त्वाभाव्यादनति॥ननुवन्मतेवुद्धिः कर्मवदनवस्थायित्वात्॥
तथायुद्धावाशुविनाशित्वासंस्कारविद्युत्पातकालीनवस्तुग्रहणवत् योग्यशेषवि
शेषधर्मविशिष्टधर्मिग्रहणंनस्यादिति चेन्न॥यथाप्रदीपार्चिषांसंतत्यमानानां
॥४३ मनवस्थायित्वेपिआभेद्यैकग्रहणंतथात्रापिस्यात्॥विद्युत्पातस्थलेयावुद्धि ॥४३॥
रुत्पन्नासास्वविषयेव्यक्तैव॥ननुबुद्धेःशरीरवदुपलभ्यमानत्वाच्छरीरगुणएवबुद्धि
रितिचेन्न॥चंदनादौपरगुणस्यशैत्यस्याप्युपलब्धेःयदिबुद्धिःशरीरगुणस्यादृष्ट
दिवायावच्छरीरभावीस्यात्॥ननुपाकजरूपादीनांयावच्छरीरभाविनैवनास्तीतिचेत्
घृतादौतत्संभवेपिपाकजरूपाद्यभावात्॥तथाचरूपादिवच्छरीरव्याप्यभावान्नश
रीरगुणाबुद्धिः॥ननुरूपादीनामपिकेषांनस्वदिव्यनुपलब्धिरस्तीतिचेन्नशरीरस्य

सकृत्पर्यंतसत्त्वात्॥ननुबुद्धेःशरीरगुणवैधर्म्यान्नबुद्धिःशरीरगुणइत्येतद्रूपादीनांपरस्पर
वैधर्म्यंतद्रूपादयोपिनशरीरगुणाःस्युरितिचेन्न॥रूपादिषुएकेन्द्रियवेद्यरूपादयःश
रीरगुणाः॥ननुहोवतिनियतेन्द्रियवेद्यत्वाभावान्नबुद्धिःशरीरगुणः॥ननुइच्छादीनांमनो
धर्मत्वेतेषांशानजन्यत्वासामानाधिकरण्येनतत्त्वकार्यकारणभावात्कथंशानस्या
त्मगुणत्वमितिचेन्न॥इच्छादीनामप्यात्मगुणत्वात्॥ननुइच्छाद्वेषयोरात्मनिवृत्ति
लिंगसाक्षात्प्रत्यक्षविशेषलिंगत्वेचेच्छायाःशरीरेप्रत्यक्षत्वादिच्छादीनामधिकरणशरी
रमेवास्त्वितिचेन्न॥अचेतनेषुपरस्थादिष्वपिभारभानिवृत्तिदर्शनात्॥एवंचशानेच्छा
दीनांचेतनधर्मावच्छेदकतयाशरीरतैकांजन्यजनकभावः॥परस्थादौचनविषयतयाक्रि
येतिभावः॥अतइच्छाद्वेषौनदेहगुणौ॥तथाशानेच्छादीनांसामानाधिकरण्येनकार्यकारण

भावप्र॥ मनसश्चेतनसद्कारित्वात्सुखताभ्यागमाच्चनेच्छादयोमनोगुणाः॥ अतश्छाद्
यआत्मगुणइतिसिद्धं॥ इतिबुद्धिपरीक्षा॥ नानाक्षानायोगपद्यान्मनएकमिसुक्तंतन्ना
नेकक्षानानामुपलब्धेरितिचेन्न॥ मनसःक्रमियत्वेपियोगपद्योपलब्धेराशुसंचारा
द्भवति॥ इतिमनुःपरीक्षा॥ प्रवृत्तिस्तुयथोक्तलक्षणवती॥ ननुद्वेषरागादिभिरेक ॥४४
॥४४ धनमयुक्तंतेषांतद्धानंनाश्रयंविनेत्याश्रयइतिचेन्न॥ रूपादीनामग्निसंयोगनाश्रयेपि
परस्परभेदात्॥ तथाचतद्दोषनाश्रयात्तद्रागद्वेषयोर्मोहनाशनाश्रयात्भेदेसु
के॥ ननुतर्हिरागद्वेषरूपदोषानित्यत्वान्मोक्षस्यदोषाभन्नंसुप्रासादितिचेन्न॥ एक
द्रव्यजातीययोरपिसद्घट्योर्निमित्तनैमित्तिकोपपत्तेः॥ इतिदोषपरीक्षा॥ नन्वप्रेत्य
भावउत्पत्तिर्निरूपस्तत्रासत्तेः किंसजातीयाभवतिवाविजातीया॥ नाद्यः निसद्ध्या

दिपरमाणुभ्यःअनित्यद्व्युत्पत्तेःस्वीकारात्॥ नद्वितीयः बाधात्॥ व्यक्तजातीयात्
व्यक्तजात्युत्पत्तेःप्रत्यक्षत्रामाण्यात्॥ ननुविघोषतःकार्यकारणभावेपिघटाद्घटनिष्प
त्तिदर्शनात्सामान्यतोपिकार्यकारणभावोभवतीतिचेन्न॥ पृथ्वीजातीयात्कपाला
दितःघटादिनिष्पत्तिदर्शनात्विशेषतः कार्यकारणभावाभावेपिसामान्यतःका
र्यकारणभावात्॥ इतिप्रेत्यभावपरीक्षा॥ ननुयागादिक्रियायाःसद्यःफलकृत्सत्स
र्वक्रियायाअनंतरमेवफलंस्यादितिचेन्न॥ धर्माधर्मादेःकालांतरेस्वर्गनरकादि
फलश्रवणात्॥ नचकर्मक्षयपरतोनाशात्स्वर्गादेःफलंनसंभवतीतिवाच्यं॥ दृष्ट
द्वारास्वर्गादिफलोत्पत्तौबाधकाभावात्॥ ननुसत्तेःफलंसद्वाअसत्वासदसत्॥ ना
द्यःसत्तउत्पत्तौविरोधात्॥ नद्वितीयअसत्तउत्पत्तौशशशृंगादेरप्युत्पत्तिःस्यात्॥ न

तृतीयः सदसतोः सत्वासत्वनक्षणवैधर्म्यात्तथेति चेन्न॥ उत्पत्तेः प्राक्फलमसत्तदानीं पदमुत्पन्नंतदानीं पदवि नष्टमुत्पत्तिविनाशयोः प्राप्तित्वात्॥ इहतत्पदं भविष्यतीति कुविंदादिप्रवृत्तिदृष्टा नासत्फलंतद्धि सिद्धमस्ति॥ ननुवस्त्रमूलमस्तकादिनाशेपि वस्त्रस्यस्वसंबंधयोः पंचत्वद्वारा फलोत्पत्तिरस्तुतथापिपटकर्तृविनाशा ॥ ४५
॥ ४५ स्वर्गादिफलोत्पत्तेः कथंस्यादिति चेन्न॥ देहनाशेपि लिंगदेहस्याविनाशात्॥ नचतर्हिदेहनाशएवसर्वत्रफलोत्पत्तिः स्यादितिवाच्यं॥ देहेसत्यपिपुत्रस्त्रीपशुपरिच्छदारण्यादिफलनिर्देशात्॥ पुत्रादिसंबंधात्फलनिष्पत्तेः पुत्रादिषुफलवदुपचारः॥ इतिफलपरीक्षा॥ ननुविविधपीडायोगशरीरसंबंधोदुःखमितिभावनीयमितियदुक्तंतत्किंसुखंवाथमितिचेदुच्यतेनाथेसुखस्यसुषुप्तेःतपुरुषार्थानस्याशक्यत्वात्तदितिचेन्न॥ सुखंवेदयतआजन्मनादेविविधंदुःखं

दर्शनात्वैराग्यार्थंदुःखवेदनस्योपदेशात्॥ तथाचस्वर्गादिदुःखभावनपत्नीगमनादिनिदानंवैराग्यस्यापपत्तेः इतिदुःखपरीक्षा॥
नजायमानोवेत्यत्रभद्रंणवान्जायतेब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यइतिश्रुतौद्रणशब्दस्यगौणत्वात्॥ ऋणानुबंधाभावेसुषुप्तौकेशनाशवत्॥ अपवर्गेकेशनाशस्याविरोधात्॥ हीनकेशस्यप्रत्यग्रभावाशानेनःपात्रचर्यातभावेनस्वर्गफलाभावाच्चापवर्गोपपत्तेः॥ इदमुक्तंकोपिदोषोनास्ति॥ नचसंततेःस्वाभाविकत्वात्तदभावोनस्यादितिवाच्यं॥ अनादेःप्रागभावस्यानित्यत्वेकेशसंततेरनित्यत्वात्॥ तथाचकेशशब्देनशरीरादयोदोषाउच्यंते॥ तेषांहेतवःस्त्रियंतरूपीस्त्रीस्वरूपवतीत्यादिविषयीकृतारूपादयोविषयाःतेषांतत्त्वज्ञानेन॥ चर्मनिर्मितपेत्यर्थोमांसास्त्रक्पूयपुरीषा॥ अस्यांरज्यतियोमूढःपिशा

च: कस्तेषु अतिहेयबुद्धे: जातायां तरुण्यादिशरीरे सुंदरीस्त्रीतियातु हि तस्यानाशो भवति॥
ततो रागादिदोषाणां नाशस्ततो धर्माधर्मात्मिकप्रवृत्तेर्नाशस्ततोदुःखाभावरूपोपवर्गो भवति
तत्र तत्स्थानविबोधेः समाधिविशेषाभ्यासाद्भवति॥ सुचिचिन्तयतिनिरोधार्थ्यः॥न
चयनितादिरागस्यप्राबल्यात्तृष्णादिप्रवर्तनाच्च समाधिर्न स्यादितिवाच्यं॥ जन्मौषधिमन्त्रतपः ॥४६॥
समाधिसंस्काराद्समाध्युत्पत्तेः॥ ईश्वरप्रणिधानात्समाधिसिद्धेः॥ननुवनितादिरागप्रा
बल्यान्मोक्षेपिअर्थावभासः स्यादितिचेन्न॥ तत्स्थानेनरागादेरभावेनशरीराभावा
त्॥एवंचसमाध्यर्थंयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाष ॥४६॥
गयोगसाधनंकर्तव्यं॥ तथावेदांतवाक्यविचारः कर्तव्यः॥ तथानित्यानित्यविवेकः॥इहा
मुत्रार्थफलभोगविरागः॥शमादिषट्कं॥मुमुक्षुत्वंतीव्रं॥ धनचतुष्टयसंपत्तिः कर्तव्या॥
तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाइतियमनिय मादीनांलक्षणंनियोगेसूत्रेस्पष्टं॥
नि॥तथाचतत्त्वज्ञानविद्ध्यर्थंसमाधिप्रकारउक्तः तत्स्थानार्थंतु अष्टपादशास्त्रा
भ्यासः कर्तव्यः॥ तथाप्रतिकूलपक्षहीनंअनुसू युभिः शिष्यगुरुसब्रह्मचारि

विशिष्टश्रेयोर्थिभिः सह संवादः कार्यः॥ ननुश्रेयोर्थिभिः सह वादस्य प्रयोजनमुक्तं॥
जल्पवितंडयोः कुत्रप्रयोजनमितिचेत् यथापश्वादिभ्यः बीजप्ररोहसंरक्षणार्थंकंट
कावरणंकार्यं॥ तथावेदत्रयीबाह्येभ्यः तत्त्वज्ञानसंरक्षणार्थंजल्पवितंडेउक्ते॥अतस्ता
भ्यांत्रयीबाह्येभ्योविवादः कार्यः॥ इतिअपवर्गपरीक्षा॥ प्रमेयपरीक्षासमाप्ता॥
श्रीगजानन॥ ननुसमानानेकधर्मोपपत्तेः संशयउक्तः सनसंभवति॥ नहिस्थाणु
समानधर्मायपुरुषसमानधर्मायमितिवाजानन्कश्चित्संदिग्धो भवति॥ तथाविप्र
तिपत्तिरपिवादिप्रतिवादिनोर्मध्यस्थस्यचनिश्चयासंशयाभावः॥तथास्वामनि
व्यवस्थितावादुपलब्धिव्यवस्थायाअनुपलब्धिव्यवस्थायाश्चनसंशयजनकत्वं॥स्वा
मनिव्यवस्थितायास्तस्याः कथमन्यत्रायत्नस्थाव स्यात्॥ तस्याअव्यवस्थाहेतु
त्वसतिसंशयानुच्छेदप्रसंगात्॥ यतस्तज्जनकज्ञानत्वादिसाधारणधर्मदर्शनस्यसंशयो
पपत्तेरितिचेन्न॥ तत्रतत्रतत्त्वहिशेषदर्शनंविनायथोक्तहेतुभ्यएवसंशयात्॥यत्रसंशयः

तत्रैवोत्तरोत्तरस्रसंगात्॥ इति संशयपरीक्षा॥ फलपरीक्षणेन प्रयोजनस्य कथितत्वात्
थक्कृतपरीक्षानक्रीयते॥ दृष्टांतादिनिर्णयांतु पदार्थानां न्यायांगत्वात् न्यायस्यप्रमाणपरि
क्षायां कथिततात्॥ पथक्कृतपरीक्षानक्रीयते॥ वादस्यन्यायघटितत्वात्तत्परीक्षयापरीक्षाजा
छल तात्॥ जातिनिग्रहस्थानघटितत्वाज्जल्पवितंडयोः तत्परीक्षयातत्परीक्षाजातात्॥ हेत्वाभासस्यन्या
यांगत्वात्पथक्परीक्षानास्ति॥ ननुवाक्छलोपचारछलयोः सामान्यधर्मेणाभेदाच्छलस्यहि
लमेववक्तव्यंनतुत्रित्वमितिचेन्न॥ सामान्यधर्मेणाभेदेपिविशेषधर्मेणाभेदाभावात्॥ सामा ॥४७॥
॥४७॥ न्यधर्मेणाभेदस्यसर्वत्रसंभवाद्विभागःकुत्रापिनस्यादितिछलपरीक्षा॥ श्रीगजाननायनमः
ननुसाधर्म्यवैधर्म्यसमयोरसदुत्तरत्वेकिंबीजमितिचेद्यथागवतरासमवेतत्वेसति गोसमवेता
सास्नादितः गोसिद्धिर्भवति॥ तथाव्यासिपक्षधर्मसहितास्नुतकत्वादेरनित्यत्वसिद्धिर्भवति॥
व्याप्यादिरहितसाधर्म्यादमूर्तत्वादेर्नानित्यत्वादिसिद्धिरितिभावः॥ ननुउत्कर्षापकर्षयोर
सदुत्तरत्वेकिंबीजमितिचेदनित्यव्याप्यस्नुतकत्वमिवरूपस्यकृतकत्वव्याप्यत्वाभावात्॥ येनक
शब्दरूपमनुमानेनादरनीयस्यात्॥ एवंशब्दरूपाभावाद्स्नुतकत्वाभावोव्यापादनीयःस्यादितिभावः॥

१ व्यापा

एवंवर्ण्यसमेपिकिंचित्साधर्म्याद्व्याप्यतावच्छेदकावच्छिन्नाद्धेतोःसाध्यसिद्धिःतादृशहेतुमत्वंच दृ
ष्टांततात्प्रयोजकं॥ नतुपक्षेयावद्विशेषणावच्छिन्नाद्धेतुःतावदवच्छिन्नहेतुमत्वं दृष्टांततात्प्रयोजकं॥
अन्यथालयापिदूषणंयादृष्टांतीकर्तव्यः सोपिनस्यात्॥ एवमवर्ण्यसमेपिव्याप्यतावच्छेदकाव
च्छिन्नस्यदृष्टांतदृष्टस्यसाध्यसिद्धिर्नतुदृष्टांतवृत्तियावद्धर्मावच्छिन्नस्यपक्षसत्वं॥ एवंविकल्प
समेपिप्रकृतसाध्यव्याप्यात्प्रकृतहेतोःसाध्यसिद्धिः॥ तद्धर्म्यकिंचिद्व्यभिचारात्प्रकृतप्रतिषे
धानसंभवति॥ नित्यकिंचिद्व्यभिचारात्प्रकृतसाध्यासाधकत्वं॥ अतिप्रसंगात्॥ एवंसाध्य
समेपिव्याप्यहेतोःसिद्धिःपक्षेसाध्यसिद्धिर्नतुपक्षदृष्टांतादयाप्यनेनसाध्यते॥ तथासतिक
श्चिदपिसाध्यसिद्धिर्नस्यात्॥ तदीयंदूषणमपिविलीयेत॥ अन्यच्चदृष्टांतेहिसाध्यमतिदिश्यते
तावतेवदृष्टांतत्वमुपपद्यते॥ नत्वशेषधर्मः॥ तथासतिपक्षदृष्टांतयोरभेदोपपत्तेः॥ पक्षादेर
पिसाध्यसमत्वंमतेनप्रसज्यते॥ ननुप्राप्यप्राप्तिसमयोरसदुत्तरत्वंकथमितिचेद्गादितः
घटादिनिष्पत्तेःसर्वलोकप्रसिद्धत्वात्॥ ननुप्रसंगसमस्यासदुत्तरत्वंकथमितिचेत्॥ दृष्टांताद्य
नवास्थितपरंपरालोकसिद्धा॥ युक्तिसिद्धावा॥ अन्यथाद्यादिप्रसक्तायप्रतीपरत्वा॥ प्रतीपप्रत्यु

अन्यथालोकवदसिद्धकार्यकारणभावोच्छेदकत्वादनुपपत्तेः स्यात्

षा०

यार्थअनवस्थितप्रदीपपरंपराप्रसज्येत॥तथात्वदीयसाधनमपिव्याहन्येत॥ननुप्रतिदृष्टांत
समस्यकथंमसदुत्तरत्वमितिचेत्प्रतिदृष्टांतस्यकिमर्थमुपादीयते॥मदीयहेतोर्बाधार्थंसत्व
तिपक्षतार्थंवा॥नाद्यःप्रतिदृष्टांतस्यहेतुलेपिमदीयोदृष्टांतोऽसाधकोनास्तिभतोबाधोनस्या
त्॥नद्वितीयेतर्हिस्वस्मिन्नेवद्वितीयःपक्षोऽस्तिहेतिवाच्यं॥मदीयदृष्टांतस्यसहेतुत्वेनाधिकृत्य
लवात्॥ननुअनुमानेसमस्यासदुत्तरत्वंकथमितिचेत्अयमाशयः॥पक्षहेतुभावोहिअनु
हिःनतुअनुमुक्तेः॥अनुमुक्तेर्हेत्वभावःसंभवति॥अधिकरणाभावात्॥नहिहेत्वभावमात्रंकासि
हिः॥त्वदीयहेतोरपिकचिदभावस्यसत्वात्॥एतेनदृष्टांतासिद्धिर्व्याख्याता॥यदाकदाचिद्धेत्व
तुसत्वेनेवदृष्टांतत्वोपपत्तेः॥एवंहेत्वादीनांयदाकदाचित्सक्षेसत्वादेवहेत्वादिभावोनतुसा
र्वकालिकीतदपेक्षा॥ननुसंशयसमस्यासदुत्तरत्वंकथमितिचेत्साधर्म्यदर्शनासंशाय
आपाद्यमानेपिनसंशयःवैधर्म्यदर्शनात्॥यदिचकार्यत्वरूपविशेषदर्शनेपिसंशयस्तदासंश
यानुच्छेदप्रसंगः॥समानधर्मदर्शनस्यनियंसंशयजनकत्वानभ्युपगमात्तथासतित्वदीयहे
तुरपिनपरपक्षंप्रतिषेधकःस्यात्॥ननुप्रकरणसमस्यकथमसदुत्तरत्वमितिचेत्॥श्रावणत्व

नपूर्वंनित्यत्वस्यसाधनाद्बाधउच्यतेसनोपपद्यते॥पूर्वसाधितत्वस्यबलवत्ताभावात्॥
कदाचिद्धृतकत्वेनानित्यत्वस्यापिपूर्वसाधनात्सक्षेप्रतिषेधोपिस्यात्॥ननुअहेतुसमस्यासदु
त्तरत्वंकथमितिचेत्॥त्रैकाल्यनत्वयायाअसिद्धिरुक्तासान॥कुतुःहेतुतःसाध्यसिद्धिस्तया
प्यभ्युपगमात्॥पूर्ववर्तितामात्रेणैवहेतुतासंभवात्॥अन्यथात्वदीयहेतोरपिसाध्येनसिध्येत्
हेतुफलभावस्वंउनेप्रतिषेधस्याप्यनुपपत्तेःप्रतिषेधव्यस्यपरकीयहेतोर्भप्रतिषेधः॥ननुअ
र्थापत्तिसमस्यकथमसदुत्तरत्वमितिचेत्॥किंउक्तेनानुक्तयकिंचिदेवार्थादापद्यतेउक्तो
पपदिकंवा॥आद्येसद्धेतानिरस्यापद्यतां॥तयानुक्तात्॥अंयेएतस्याअर्थापत्तेर
नैकांतिकत्वं॥एकपक्षसाधकत्वंतत्रास्ति॥नहिअनित्यत्वस्योपपादकंनित्यत्वं॥नहिविशे
षविधिमात्रंशेषनिषेधफलकंमपितुसतितासत्यैकचित्॥नहिनीलोघटइत्युक्तेअन्यद्नि
लमितिकश्चित्प्रतिपद्यते॥ननुअविशेषसमस्यकथमसदुत्तरत्वमितिचेत्॥हेतोर्व्याप्यादि
रूपधर्मस्यकचित्कृतकत्वादौसत्वात्॥कचित्सत्वादौअभावात्तदुक्तप्रतिषेधोनसंभवति

ननुउपपत्तिसमस्यासदुत्तरत्वे किं मानमितिचेत्॥ त्वयासदृशस्य दृष्टांतीकरणेनसप्रमाणत्वा
भ्युपगमात्॥ कथंतत्प्रतिषेधः स्यात्॥ ननुउपलब्धिसमस्यासदुत्तरत्वेकिंमानमितिचेत्॥ नाहं
वयंअवधारणार्थंवाकिंमानधूमादियादिकंप्रयुंमहे॥ अपितुसंदिग्धस्यवस्तुनेःसिध्यर्थं॥
अन्यथासदुक्तंअसाधकतासाधनमपिनस्यात्॥ असाधकतासाधकातरस्यापिसत्वात्
॥४९॥ ननुअनुपलब्धिसमस्यासदुत्तरत्वेकिंमानमितिचेत्॥ उपलब्धेःस्वासन्नप्यनुपलब्ध ॥४९॥
अतः लात्॥ तत्रानुपलब्धेरनुपलंभादियादिकंनवाच्यं॥ अन्यथात्वसाधनमपिदोषानुप
लब्धेरनुपलंभात्सदोषमेवस्यात्॥ नन्वनुपलब्धेःस्वास्मिन्नेपिअनुपलब्धिस्तेऽनुप
लब्धिरपिकेनसिध्येदितिचेत्॥ घटंसाक्षात्करोमिनसाक्षात्करोमिवाकिंमनुमिनोमि
नानुमिनोमीत्येवंज्ञानविशेषतदभावानांमनसेवसुग्रहात्॥ ननुअनित्यसमस्यास
दुत्तरत्वेकिंमानमितिचेत्॥ त्वयाह्येवंसाध्यते कृतकत्वंनसाधकं॥ दृष्टांतसाधर्म्यरूपत्वात्
सिंहवादिवत्॥ अथचसदीयोहेतुस्तत्प्रतिषेध्यनमदीयहेतुनाकृतकत्वेनसत्वेनचसाध्यते
सहसाधर्म्यरूपस्तथाचायमपिनसाधकःस्यात्॥ यदिचसाधर्म्यमात्रंनसाधकंअपितुसा
सिसहितमिसाभिमतंतदाकृतकत्वेतदस्तिनतुसत्वे॥ ननुनित्यसमस्यासदुत्तरत्वेकिंमानमिति

चेद्॥ मसक्षेशब्दे सर्वदाअनित्यत्वात्नित्यत्वंनोपपद्यते॥ नाहिसंभवतिअनित्यंनित्यमस्ती
ति॥ व्याघातात्॥ नचनित्यमितिसर्वकालमित्यर्थस्तथाचशब्दस्य [redacted]अनित्यत्वंकथंसर्व
कालमनित्यत्वंबाधतइतिवाच्यं॥ सर्वकालमित्यस्यावत्सत्वमित्यर्थात्॥ अतस्तत्कृतःप्रतिषेधोन
संभवति॥ ननुकार्यसमस्यासदुत्तरत्वेकिंमानमितिचेत्॥ शब्दस्यकार्यत्वेतत्प्रयत्ननस्या
हेतुत्वं॥ इदंचतदास्याद्यदनुपलब्धिकारणावरणादिकमुपपद्यते॥ नचतच्छब्देस्ति॥ अथ
चप्रयत्नानंतरीयकत्वेनशब्दानित्यत्वंसाधयति॥ अनैकांतिकत्वादितियोदोषःसत्वसाधनेपितुल्यः
अथवाअनैकांतिकत्वात्साधकश्चेत्वयायःप्रतिषेधःकृतस्तत्राप्ययंदोषःसमानः॥ नह्यनैकां
तिकंसर्वस्यैवासाधकतांसाधयति॥ स्वस्यैवासाधकतासाधनत्वात्॥ ननुयंमतानुज्ञाकिंका
र्यसमायामेवेतिचेन्न॥ एवंविधमसदुत्तरंसर्वत्रजातौसंभवति॥ यथाशब्दोअनित्यःशब्दत्वात्॥
इत्यत्रनित्याकाशसाधर्म्यादमूर्तत्वान्नित्यःस्यादितिसाधर्म्यसमायां॥ अकाशसाधर्म्यान्नित्यत्वे
अकाशवच्छब्दपरममहत्संस्यादितिउत्कर्षसमाएवमन्यत्राप्युह्यं॥ अत्रेयंषट्पक्षीउच्यते॥ यथा
शब्दोऽनित्यःप्रयत्नानंतरीयकत्वात्तिवादिनःप्रथमःपक्षः॥ प्रयत्नकार्यानेकत्वात्कार्य
सनशतिप्रतिवादिनोद्वितीयःपक्षः॥ प्रतिषेधप्रतिषेधेपिअनैकांतिकत्वंतुल्यमितिवादिनस्तृ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तीयः पक्षः॥ तत्रापि तथैवानेकांतिकंथासमानदोषादनेरतिचतुर्थः पक्षः॥ द्वितीयंपक्षंस
दोषमभ्युपेत्य तत्समदूषणमन्यस्य मतीयतृतीयपक्षेसमानंदोषं प्रसंजयतस्तवमतानुज्ञा
नामकं निग्रहस्थानंशतिपंचमःपक्षः॥ मतीयपक्षदोषमनूद्यैवस्वपक्षोपपादनंकुर्वतस्त्व
यादृष्टनिर्दिष्टः प्रतिषेधोपसमानोदोषइति॥ तावतात्वयापिमतानुज्ञैवकृता॥ तदेवंषड्पक्षाः
उभयोरप्यनुक्तावादितारर्थानिहि[illegible]दितस्थापनाद्वारीजातिवादिनं सदुत्तरेणैवदूषय
तितरांषड्पक्षीनप्रवर्तते॥ इतिश्रीगणेशशास्त्रिकृतगौतमसूत्रतात्पर्यषोडशपदार्थैक
थनरूपप्रकरणंसमाप्तं॥ शुभंजाननार्पणमस्तु

॥५०॥

॥५०॥